The Visishtadvaita Pracharini Sabha Publications

SRI VISHNUSAHASRANAMA

WITH

Nirukti Ślokas
(Etymological Interpretation for each Nama)

together with

English Translation of the Introduction—
Portion only of Sri Parasara Bhatta's Bhashya

Prepared by Sri K. BHASHYAM

Edited by

Sri Uttamur VIRARAGHAVACHARYA

PUBLISHERS

The Visishtadvaita Pracharini Sabha
(Registered)

7, NATHAMUNI STREET, T' NAGAR
MADRAS-17.

Price **1960** ***Rs. 2/-***

Books Ready for Sale

		ரூ.	ந.பை.
1.	திருவிருத்தம் பிரபந்தரக்ஷையுடன் ...	2	00
2.	,, திருவாசிரியம்—பெரிய திருவந்தாதி ...	2	00
3.	பெரிய திருவந்தாதியும், திருவாய்மொழி அவதாரிகையும் ,, ...	2	00
4.	திருவாய்மொழி (1—30) ,, ...	2	00
5.	,, (31—74) ,, ...	2	00

இனியும் ஒவ்வொரு மலரும் 100 பக்கங்கள் கொண்டதே. விலை ரூ. 2/- விரிவான உரையுடன் விரைவில் அச்சாகிறது.

6.	Sri Vishnusahasranama with Nirukti and English Introduction ...	2	00
7.	Dasopanishads in 5 Volumes with Bhashya and Parishkara ...	30	00
8.	Minor Upanishads ,, ...	6	00
9.	Gitartha Sangraha with Tamil and English Translations ...	3	50
10.	முதலாயிரம்—முழுமையும் பிரபந்த ரக்ஷையுடன் ...	26	00
11.	இயற்பா—நான்கு திருவந்தாதிகள் ,, ...	6	50

முதலாயிரத்தில் அடங்கிய திவ்வியப் பிரபந்தங்கள் தனித்தனியாகவும் பெறப்படும்.

—Address—

The Secretary,

THE VIŞIṢHTADVAITA PRACHARINI SABHA

7, Nathamuni Street, T. Nagar, Madras-17.

PREFACE

Sri Parasara Bhattarya's Sri Vishnu Sahasranama Bhashyam, which is named Bhagavad Guna Darpana, is well-known for its depth of exposition and wealth of elucidation. An English translation of it has been a longfelt want. Vidwan Sri Uttamur T. Viraraghavacharya Swami and the late Sri K. Bhashyam had in collaboration met this want.

Bhattarya establishes in his Introduction, *i.e.*, (Upodghata) the sovereign remedy that the Sahasranama Stotra provides to make life worthy. The English Translation of this introductory portion of the Bhashya and along with it the text of the Sahasranama with 'Nirukti' slokas bringing together the various meanings of each Nama and the whole improved and well-arranged so as to help memorising, have been printed. The Visishtadvaita Pracharini Sabha have resolved to present them at once to the public as an initial volume. They hope that the English translation of the main Bhashya (by the late Sri K. Bhashyam) now in manuscript form, will soon be printed and issued to the public.

Madras,
8—10—60.

S. VARADACHARIAR,
President.

श्रीः ॥

गुरुभ्यो नमः

श्रीपरमात्मने नमः ॥

श्रीविष्णुसहस्रनामस्तोत्रम्

श्रीभट्टपराशरभाष्यानुसारिनिरुक्तिसहितम्

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥ यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम्। विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ २ ॥ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्। पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ३ ॥ व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे। नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ अविकाराय शुद्धाय नित्याय परमात्मने। सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ५ ॥ यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्। विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ६ ॥ (नमः समस्तभूताना-मादिभूताय भूभृताम्। अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ ७ ॥) ओं नमो विष्णवे प्रभविष्णवे ॥

श्रीवैशम्पायन उवाच—श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः। युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ८ ॥ युधिष्ठिर उवाच। किमेकं दैवतं लोके किं वाऽप्येकं परायणम्। स्तुवन्तः कं कमर्चन्तः प्राप्नुयु-र्मानवाः शुभम् ॥ ९ ॥ को धर्मः सर्वधर्माणां भवतः परमो मतः। किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ १० ॥ श्रीभीष्म उवाच— जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्। स्तुवन्नामसहस्रेण पुरुषस्सततो-त्थितः ॥ ११ ॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्। ध्यायन् स्तुव-न्नमस्यंश्च यजमानस्तमेव च ॥ १२ ॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्व-रम्। लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्। ब्रह्मण्यं सर्वधर्मज्ञं

लोकानां कीर्तिवर्धनम् । लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ १४ ॥ एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १५ ॥ परमं यो महत्तेजः परमं यो महत्तपः । परमं यो महद् ब्रह्म परमं यः परायणम् ॥ १६ ॥ पवित्राणां पवित्रं यो मङ्गलानां च मङ्गळम् । दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १७ ॥ यतः सर्वाणि भूतानि भवन्त्यादियुगागमे । यस्मिंश्च प्रळयं यान्ति पुनरेव युगक्षये ॥ १८ ॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते । विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १९ ॥ यानि नामानि गौणानि विख्यातानि महात्मनः । ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ २० ॥ ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः । छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥ २१॥ अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः । त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥ २२ ॥ विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् । अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् ॥ २३ ॥

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य श्रीवेदव्यासो भगवानृषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता । अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनस्स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव इति परमो मन्त्रः । शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इयि नेत्रम् । त्रिसामा सामगस्सामेति कवचम् । आनन्दं परब्रह्मेति योनिः । ऋतुस्सुदर्शनः काल इति दिग्बन्धः । श्रीविश्वरूप इति ध्यानम् । श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः ॥ ध्यानम् ॥ क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः । शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैरानन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥ भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे कर्णावाशाश्शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः । अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैश्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् । लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।

पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥ (सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् । सहारवक्षःस्थलशोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम् ॥ छायायां पारिजातस्य हेमसिंहासनोपरि । आसीनमम्बुदश्याममायताक्षमलंकृतम् ॥ चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम् । रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये ॥)

ओं

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।

भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥

श्रीविष्णुसहस्रनामनिरुक्तिः

(1) विश्वम्—विश्वं सर्वत्र पूर्णत्वात् स्वरूपगुणवैभवैः । (2) विष्णुः—चराचरेषु भूतेषु वेशनात् विष्णुरुच्यते ॥ (3) वषट्कारः—स्वेच्छया यो वशे सर्वं वषट्कारः करोति सः । (4) भूतभव्यभवत्प्रभुः—त्रिकालवर्तिनां शेषी भूतभव्यभवत्प्रभुः ॥ (5) भूतकृत्—भूतानि योऽसौ सृजति स्वातन्त्र्येण स भूतकृत् । (6) भूतभृत्—भूतभृत् भूतभरणात् (7)भावः—श्लिष्टत्वात् भाव ईरितः ॥ (8) भूतात्मा—शरीरभूतभूतानां भूतात्माऽऽत्मतया स्मितः । (9) भूतभावनः—धारकादिप्रदानेन यश्च वर्धयति स्वयम् ॥ भूतानि नित्यं झटिति सतु स्यात् भूतभावनः ।

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषस्साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥

(10) पूतात्मा—शरीरत्वाच्च जगतः तद्दोषैर्न कदाचन ॥ लिप्यते यः स पूतात्मा न भुंक्ते च फलानि यः । (11) परमात्मा—येन भूतान्यात्मवन्ति नायमन्येन चात्मवान् ॥ अतो ह्यात्मेश्वरत्वाच्च परमात्मा प्रकीर्तितः। (12) मुक्तानांपरमागतिः—ब्रह्मसाधर्म्यमापन्ना मुक्तास्तेषां परा गतिः ॥

मुख्यप्राप्यस्ततश्शोषी मुक्तानां परमा गतिः। (13) अव्ययः—न क्षीयते च वैकुण्ठान्मुक्तोऽधस्तादतोऽव्ययः॥ (14) पुरुषः—मुक्तेभ्यः स्वात्मपर्यन्तदानात् पुरुष ईरितः। (15) साक्षी—स्वयमामन्दयन् तृप्यन् साक्षी साक्षात्करोति सः॥ (16) क्षेत्रज्ञः—क्षेत्रं तु परमव्योम मुक्तेभ्यो वेत्ति नित्यशः। दातुं स्वानुभवं यश्च क्षेत्रज्ञः स तु कथ्यते॥ (17) अक्षरः—सदाऽनुभूयमानोऽपि निस्सीमगुणगौरवात्। मुक्तैः क्वचिन्न क्षरतीत्यक्षरः परिकीर्तितः॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥

उक्तं हि मुक्तप्राप्यत्वमथोपायत्वमुच्यते। (18) योगः—साक्षान्मोक्षैकहेतुत्वात् योग इत्यभिधीयते॥ (19) योगविदां नेता—उपायभक्तिनिष्ठा ये ते च योगविदः स्मृताः। तेषां च फलपर्यन्ते नेता निर्वाहकश्च यः॥ (20) प्रधानपुरुषेश्वरः—बन्धहेतोः प्रधानस्य बध्यमाननृणां च यः। नियामकः सर्वदा स प्रधानपुरुषेश्वरः॥ (21) नारसिंहवपुः—नरवत् सिंहवद्रूपं यो बिभर्त्यभयप्रदम्। यथाकामं तु भक्तानां नारसिंहवपुश्च सः॥ (22) श्रीमान्—विरुद्धाकारवत्त्वेऽपि श्रीमान् सर्वमनोहरः॥(23) केशवः—प्रशस्तनीलकेशत्वात् केशवः परिकीर्तितः॥ (24) पुरुषोत्तमः—बद्धादिपुरुषेभ्यो यो ह्युत्कृष्टः पुरुषोत्तमः।

सर्वश्शर्वश्शिवः स्थाणुर्भूतादिर्निधिरव्ययः।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥ ४ ॥

(25) सर्वः—चराचरशरीरेषु व्याप्तिमान् सर्व ईरितः॥ (26) शर्वः—स्वशरीरजगद्दुःखं शर्वस्स स्यात् शृणाति यः। (27) शिवः—शुभावहत्वात् भक्तानां शिव इत्यभिधीयते॥ (28) स्थाणुः—संशमय्याशिवं सर्वं विश्रण्यापि शिवं बहु। स्वयं न विश्राम्यति यः स स्थाणुः परिकीर्तितः॥ (29) भूतादिः—भूतैर्यः प्राणिभिर्नित्यं स्पृहणीयतमत्वतः। उपादानाद्धि भूतादिरुच्यते सुन्दराकृतिः॥ (30) निधिरव्ययः—यः सदापह्नवमिव निधेयत्वान्निधिः स्मृतः। सदोपभुज्यमानोऽपि कलयाऽप्यनुपक्षयात्॥ अव्ययः स्यान्निधेरेतद्विशेषणमुदाहृतम्। अतोऽव्ययो

निधिरिति ह्येकनाम प्रकीर्तितम् ॥ (31) संभवः—निधिवद्ध्यातिगूढोऽपि रामकृष्णादिभेदतः । समन्ताद्बहुधा जातः संभवः परिकीर्तितः ॥ (32) भावनः—जनित्वोज्जीवयति यो जनान् स्यात् भावनस्तु सः । (34) प्रभवः—देवादिजनवैजात्यात् प्रकृष्टोत्पत्तिमत्त्वतः । अविद्यादोष-वैधुर्यात् प्रभवः परिकीर्तितः ॥ (35) प्रभुः—ब्रह्मादीनां च सर्वेषां भोग-मोक्षसमर्पणे । समर्थः प्रभुरित्युक्तः सर्वेष्टफलदो मनुः ॥ (36) ईश्वरः—मनुष्याद्यवतारेऽपि ब्रह्मादींश्च प्रयोजने । नियन्ता त्वीश्वरः प्रोक्तः प्राधान्यफलदो मनुः ॥

स्वयंभूश्शंभुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥

(37) स्वयम्भूः—भवति स्वेच्छया योऽसौ स्वयंभूः परिकीर्तितः । (38) शंभुः—सौन्दर्यादिगुणानां यो ह्याविष्कारेण शं सुखम् । पुंसां सम्यग्भावयति स शंभुः परिकीर्त्यते । (39) आदित्यः—निवासः सविता यस्य स आदित्यः प्रकीर्तितः ॥ (40) पुष्कराक्षः—अक्षिणी पुण्डरीके व भक्तानुग्रहकारिणी । यस्यासौ पुष्कराक्षः स्यादष्टवर्णस्तु पावकः ॥ (41) महास्वनः—महान् पूज्यस्त्रयीरूपः स्वनो यस्य महास्वनः । (42) अनादिनिधनः—नास्ति यस्यादिनिधनम् अनादिनिधनश्च सः । अनादिनिधनोपास्यो नित्ययौवन-विग्रहः । (43) धाता—अचित्समष्टिभूतायां प्रकृतौ चित्समष्टिकम् । गर्भं विध्यात्मकं धत्ते यस्तु धातेति चक्षते । (44) विधाता—तद्गर्भपरिणामे स्यादाविर्भावयिता स्वयम् । धारणाल्लीलया यस्मात् विधाताऽयं प्रकीर्तितः । (45) धातुरुत्तमः—यो वै स्याद्धातुरुत्कृष्टः स च स्यात् धातुरुत्तमः ॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥

(46) अप्रमेयः—ब्रह्मादीनां च करणैर्नो मातुमपि शक्यते । द्रष्टुं ह्यसावप्रमेयः वचसामप्यगोचरः ॥ (47) हृषीकेशः—इन्द्रियाणां निय-न्तृत्वात् हृषीकेशः प्रकीर्तितः । (48) पद्मनाभः—कालात्मकं तु यत्पद्मं

नाभौ यस्य स उच्यते। पद्मनाभश्चाष्टवर्णो महासन्तानदो मनुः। (49) अमरप्रभुः—सृष्ट्यादिष्वपि देवानामधिकारप्रदानतः। अमरप्रभुरित्युक्तो नवार्णः सर्वदो मनुः॥ विश्वकर्मा—विश्वञ्च जगतः कर्म व्यपारो यस्य लक्षणम्। प्राक् ब्रह्मसृष्टेरूर्द्ध्वं च विश्वकर्मेति कथ्यते। (51) मनुः—संकल्पलवमात्राच्च मननान्मनुरुच्यते॥ (52) त्वष्टा—नामरूपव्याकरणात् त्वष्टा सृष्टस्य गद्यते। (53) स्थविष्ठः—बहुभवंश्च सूक्ष्माणां स्थूलावस्थतया च सः॥ विस्तारवत्त्वाद्यः स्थूलः स्थविष्ठः परिकीर्तितः। (53) स्थविरः—कालातन्त्रतया दुग्धदध्यादिभ्यो विलक्षणः। विद्यते यः सर्वकालं स्थविरः परिकीर्तितः। (55) ध्रुवः—अप्रच्याव्यस्वस्वरूपात् सदा योऽसौ ध्रुवः स्मृतः॥

अग्राह्यश्शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।
प्रभूतस्त्रिककुद्धा (ब्धा) म पवित्रं मङ्गळं परम्॥ ७॥

(56) अग्राह्यः—अग्राह्यो योऽनधिष्ठेयो मृत्तिकेव कुलालकैः। (57) शाश्वतः—अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः॥ अतः सदाप्रवाहत्वात् नित्यः शाश्वत उच्यते। (58) कृष्णः—एकान्तलीलारसतो निर्वृतः कृष्ण उच्यते॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। (59) लोहिताक्षः—रक्तराजीवनयनो लोहिताक्षः प्रकीर्तितः॥ (60) प्रतर्दनः—यस्य ब्रह्म क्षत्रमेवमोदनो भवतस्सदा। प्रतर्दनः स विज्ञेयः संहर्तृत्वप्रदो मनुः॥ (61) प्रभूतः—भोगोपकरणं नित्यं निर्मर्यादं परं पदम्। यस्य तेन समृद्धत्वात् प्रभूत इति कथ्यते॥ (62) त्रिककुद्धाम—त्रिपाद्विभूतिस्त्रिककुत् सैव स्थानं विशेषतः। यस्य स त्रिककुद्धामा, यद्वा त्रियुगधर्मवान्॥ आर्षं निरुक्तमाश्रित्य त्रिककुत् स्यात् त्रिलक्षणः। अस्मिन् पक्षे भिन्ननाम धाम ज्योतिस्स्वरूपवान्॥ व्याख्यातॄणामभिप्रायो नामैकत्वेऽपि कीर्तितः। "तथैवासं त्रिककुदो वाराहं रूपमास्थितः॥ त्रिककुत्तेन विख्यातः शरीरस्य प्रमापणात्।" (63) पवित्रम्—गुणस्य विभवानां च रूपस्य च निरन्तरम्॥ निरूपकस्य सर्वैश्च तन्निरूप्यं स्वरूपकम्। अनुप्रविश्य वसति तत् पवित्रमिति स्मृतम्॥ (64) मङ्गलं परम्—सर्वहेयप्रत्यनीकमनन्तानन्दलक्षणम्। वेदान्तपारगं नित्यमुच्यते मङ्गलं परम्॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

(65) ईशानः—सर्वावस्थासु सर्वेषां व्यवस्थापनशीलतः । वस्तूनां भगवान् साक्षात् ईशानः परिकीर्तितः ॥ (66) प्राणदः—सूरिभ्यः परिचर्यादौ बलदः प्राणदः स्मृतः । (67) प्राणः—उज्जीवनस्य हेतुत्वात् नराणां प्राण ईरितः । (68) ज्येष्ठः—सर्वदाऽनुभवेऽप्येतैरदृष्टापारभूतितः । ज्येष्ठः (69) श्रेष्ठः—श्रेष्ठश्च तैर्नित्यं स्तुतत्वादभिधीयते ॥ (70) प्रजापतिः—बद्धादुत्कृष्टतो ये च जायन्ते सूरयः प्रजाः । तेषां यो नित्यसूरीणां पतिस्स स्यात् प्रजापतिः ॥ (71) हिरण्यगर्भः—[हिरण्यं परमं धाम हिरण्यस्य समानतः । हिरण्यगर्भस्स प्रोक्तस्तस्मिन् वसति यस्सदा ॥] (72) भूगर्भः—यस्य भूर्भरणीयाऽभूत् भूगर्भोऽनुभवेन सः । (73) माधवः—श्रियः श्रद्धादिनाम्न्याश्च पतिर्माधव इष्यते ॥] (74) मधुसूदनः—मध्वाख्यमसुरं हन्ति सूरीणां करणं च वा । उपसंहरति स्वस्मिन् मधुसूदन इष्यते ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥

(75) ईश्वरः—ईशनात् रमणाच्चापि त्वीश्वरः परिकीर्तितः । (76) विक्रमी—विक्रमः पौरुषं प्रोक्तः तद्वत्त्वात् विक्रमी बुधैः (77) धन्वी—पौरुषानुगुणं शार्ङ्ग यस्य धन्वी स कथ्यते । (78) मेधावी—निस्सीमभूमानुगुणनित्यसार्वज्ञ्यलक्षणा । मेधा यस्यास्ति स प्रोक्तः मेधावीति विचक्षणैः । (79) विक्रमः गमनं पक्षिराजेन यस्य विक्रम उच्यते ॥ (80) क्रमः—क्रमणात् क्रमहेतुत्वात् क्रम एवमुदाहृतः । 81 अनुत्तमः—उत्तमो नास्ति यस्मात् स त्वनुत्तम उदाहृतः] (82) दुराधर्षः—अपांनिधिवदक्षोभ्यः दुराधर्ष इतीरितः । दुर्विज्ञेयगतिर्यस्मात् दुराधर्षः प्रकीर्तितः । (83) कृतज्ञः—प्राणिभिर्यत् कृतं कर्म तज्ज्ञात्वा फलदो यतः । पत्रपुष्पादिना तुष्टः कृतज्ञो मोक्षदानतः । (84) कृतिः—यस्मात् प्रसन्नात् सुकृतं तेषां स कृतिरिष्यते ॥ प्रयत्नो वा क्रिया वाऽथ कृतिरुक्ता क्रियावताम् । (85) आत्मवान्—एषामात्मशरीरादिनिरासादथ वाऽऽत्मवान् । स्वे महिम्नि प्रतिष्ठानादात्मवान् अभिधीयते

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहस्संवत्सरो व्याळः प्रत्ययस्सर्वदर्शनः ॥ १० ॥

(86) सुरेशः—ब्रह्मादीनां फल्गुपदलिप्सूनां त्रिदिवौकसाम् । संविधाता सुरेशश्च प्रोच्यते विबुधोत्तमैः ॥ (87) शरणम्—आर्तानामार्तिहन्तृत्वात् शरणं परिकीर्तितः। यदुपासं भयं दुःखं पापं बन्धो न बाधते ॥ प्रतिष्ठा च सुखं ज्ञानं भवेत् शरणमित्यतः । (88) शर्म—परमानन्दरूपत्वात् शर्म हिंसादिमन्थनात् ॥ (89) विश्वरेताः—विश्वं रेतो भगवतो विश्वरेता हरिः स्मृतः। ज्ञानेन्द्रियादिकं विश्वं परिचर्यार्थमेव हि ॥ यः प्रजानां करोतीति विश्वरेता [illegible] (90) [illegible]—[illegible] करणैः तस्मिन्नभिमुखाः प्रजाः । सर्वाश्चैव भवन्तीति प्रजाभव उदाहृतः । (91) अहः—न सन्ति हीना यस्येति त्वहस्स परिकीर्तितः । अनाद्यविद्यानिद्रायां स्वधीहेतुतयाऽप्यहः ॥ (92) संवत्सरः—इत्थं तेषु प्रबुद्धेषु वसत्युद्धरणाय यः। संवत्सरः, (93) [illegible] एताना[illegible] करोतियः । (94) प्रत्ययः—योऽसौ प्रत्याययति तान् प्रत्ययः स उदाहृतः ॥ (95) सर्वदर्शनः—महिमानं सर्वसहं तेषां दर्शयतीति सः । सर्वदर्शन आख्यातो नवार्णो लोचनप्रदः ॥

अजस्सर्वेश्वरस्सिद्धस्सिद्धिस्सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः ॥ ११ ॥

(96) अजः—प्रत्यर्थिनः स्वसंप्राप्तौ प्रजानां क्षिपतीत्यजः । (97) सर्वेश्वरः—अशक्तानां च शक्तानां वैरूप्यं शरणैषिणाम् । अश्नुते परिहर्तुं यः स सर्वेश्वर ईरितः ॥ (98) सिद्धः—स्वरूपेणैव भक्तानां सिद्धत्वात् सिद्ध उच्यते ॥ (99) सिद्धिः—अयमेव ह्युपायैश्च सिद्धिः स्यात् साध्यते यतः । (100) सर्वादिः—सर्वेषां पुरुषार्थानां मूलं सर्वादिरीरितः ॥ 101 अच्युतः—भक्तेभ्योऽच्युतपूर्वत्वादच्युतः परिकीर्तितः । आश्रितानां च्युतिर्यस्मान्नास्ति सोऽच्युत ईरितः ॥ (102) वृषाकपिः—कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते । तस्मात् वृषाकपिः प्रोक्तो वस्वर्णोऽभीष्टदो मनुः ॥ (103) अमेयात्मा—इयानित्यपरिच्छेद्यस्वभावात् सर्वतोऽधिकः । अमेयात्मा समुद्दिष्टो ह्यौन्नत्यफलदो मनुः ॥ (104) सर्वयोगविनिस्सृतः—सर्वैरुपायैः प्राप्यश्च सर्वयोगविनिस्सृतः ।

वसुर्वसुमनास्सत्यस्समात्मा संमितस्समः ।
अमोघः पुण्डरीकाक्षो वृषाकर्मा वृषाकृतिः १२

(105) वसुः—वसतीति वसुस्तेषु प्रीत्या परमया स्वयम् । (106) वसुमनाः—वसुनीव निधौ तेषु मनो यस्यास्ति सर्वदा । सर्वैः वसुमनाः प्रोक्तो मातृवत् पोषको मनुः ॥ (107) सत्यः—सत्सु साधुः सत्य इति (108) समात्मा—समात्मा समचित्ततः । (109) संमितः—मितत्वाच्च तथा भक्तैः संमितः परिकीर्तितः ॥ (110) समः—ज्ञानेऽपरिचिते चापि समत्वात् सम उच्यते । (111) अमोघः—वितथस्पर्शरहितः स ह्यमोघः प्रकीर्तितः ॥ (112) पुण्डरीकाक्षः—पुण्डरीकं परं धाम नित्यमक्षरमव्ययम् । तद्गतानामक्षिभूतः पुण्डरीकाक्ष ईरितः ॥ (113) वृषकर्मा—श्रेयस्करं धर्मरूपं कर्म यस्य प्रचक्षते । वृषकर्मेति विख्यातः
वृषाकृतिः—धर्मरूपाकृतिर्यस्य स वृषाकृतिरुच्यते ॥ तापत्रयाग्निदग्धानां सुधेवात्यन्तशीतलम् । रूपं कर्म च यस्यास्ति, वृषकर्मा वृषाकृतिः ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिश्शुचिश्रवाः ।
अमृतश्शाश्वतस्थाणुर्वरारोहो महातपाः ॥ १३ ॥

(115) रुद्रः—ईदृग्रूपैश्चेष्टितैश्च भक्तान् सानन्दबाष्पयन् । रोदयन् रुद्र उद्दिष्टः सर्वसन्तोषदो मनुः । (116) बहुशिराः—फणाश्च बहवो यस्य स वै बहुशिरा मतः ॥ (117) बभ्रुः—अनन्तरूपो यो धत्ते पृथ्वीं बभ्रुः स ईरितः । (118) विश्वयोनिः—विश्वेषां भेजुषां स्वेन विश्वयोनिस्तु मिश्रणात् ॥ (119) शुचिश्रवाः—भक्तैरुक्तान्यवश्यं यः शृणोति स शुचिश्रवाः । (120) अमृतः—जरामृत्योर्वारणेन ह्यतृप्तेर्वापि सेवनात् । अमृतः स्यान्निरतिशयमाधुर्येण च सर्वदा । (121) शाश्वतस्थाणुः—भोग्यो ह्यपुनरावृत्त्या भोक्तृभ्यो रोचते यतः । स्वयं नित्यः सदा योऽसौ शाश्वतस्थणुरुच्यते । (122) वरारोहः—वर उत्कृष्ट आरोहो यस्य स्वप्राप्तिलक्षणः । वर्तते स वरारोहः प्रकृष्टस्थानदो मनुः । द्वाविंशतिशतेनैतैर्वरारोहान्तनामभिः । किमेकं दैवतमिति किमित्येकं परायणम् । इति प्राप्यप्रश्नयुग्मस्योक्तमुत्तरमत्र च । व्यूहीयो

वासुदेवोऽपि व्याख्यातोऽत्रैव संग्रहात् । अथ संकर्षणात्मानं वक्ष्यत्युत्तरनामभिः—(123) महातपाः—महत् पूज्यं तपो ज्ञानं यस्येति स महातपाः ।

सर्वगस्सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥ १४ ॥

(124) सर्वगः—धारयन् संहृतान् सर्वान् गच्छतीति स सर्वगः ॥ (125) सर्ववित्—प्रद्युम्नत्वे तु कार्याणि लभते यः स सर्ववित् । (126) भानुः—भानुस्सर्वस्य भातीति निर्माणेऽप्यविकारतः ॥ (127) विष्वक्सेनः—इनेन स्वामिना साकं वर्तते सेन इत्ययम् । विष्वङ् रक्ष्यो जनोऽस्यासावनिरुद्धस्तथेरितः । (128) जनार्दनः—भक्तविद्वेषिणां तूर्णं मर्दनात् स जनार्दनः । (129) वेदः—संकर्षणत्वे शास्त्रार्थप्रदत्वात् वेद ईरितः । (130) वेदवित्—असंशयविपर्यासं वेदार्थं वेत्ति वेदवित् । (131) अव्यङ्गः—शिक्षाव्याकरणाद्यङ्गैर्न हीनोऽव्यङ्ग उच्यते ॥ (132) वेदाङ्गः—यस्य वेदोऽनन्तशाखोऽप्यङ्गम्, वेदाङ्ग एव सः (133) वेदवित्—वेदैर्वेद्यतया वेदस्तदर्थो धर्म उच्यते । तदनुष्ठापनान्नित्यं प्रद्युम्नो वेदवित् स्मृतः । (134) कविः—स एव क्रान्तदर्शित्वात् कविरित्युच्यते बुधैः ॥

लोकाध्यक्षस्सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥

135, 136, 137 लोकाध्यक्षः–सुराध्यक्षः–धर्माध्यक्षः—धर्माधिकारिणो लोकाः, तदाराध्यास्सुरास्तथा । धर्मस्तत्साधनम्, तेषामध्यक्षः स्यात् त्रिनामवान् ॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्ष इति क्रमात् । अनिरुद्धः स विज्ञेयो लोकाध्यक्षादिनामवान् ॥ (138) कृताकृतः—अनित्यनित्यफलदौ प्रवर्तकनिवर्तकौ । धर्मौ यस्य स्वरूपं स कृताकृत इतीरितः ॥ (139) चतुरात्मा—वासुदेवादिरूपत्वात् चतुरात्मेति कथ्यते (140) चतुर्व्यूहः—जाग्रत्स्वप्नसुषुप्त्यादि व्यूहावस्थाचतुष्टयम् । एतद्विशिष्टमूर्तित्वात् चतुर्व्यूह इतीरितः । (141) चतुर्दंष्ट्रः—दंष्ट्राचतुष्क-

युक्तत्वात् चतुर्दंष्ट्र इति स्मृतः। महापुरुषरूपत्वात् (142) चतुर्भुजः—परः स स्यात् चतुर्भुजः।

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

(143) भ्राजिष्णुः—उपासितृभ्यो भ्राजिष्णुः स्वप्रकाशनशीलतः। (144) भोजनम्—सुखेन भोजनं प्राहुर्यो भक्तैरनुभूयते। (145) भोक्ता—भोक्ताऽर्पितस्य भोक्तृत्वात्, भोक्ता स्यादमृतस्य वा ॥ (146) सहिष्णुः—प्रागूर्द्धं संचितानां च बुद्ध्या च करणैः सदा। कृतानां सर्वथा तेषां निषेधविधिशासनम्। अतीत्य क्रियमाणानाम् असत्स्वेवानुबन्धिनाम् (स्वावज्ञानिन्दनात्मनाम्?। सर्वसहेन स्वेनापि दुस्सहानां विशेषतः। स्वभक्तविषयाणां च निर्मर्यादानामिहैनसाम्। सहनैकस्वशीलत्वात् सहिष्णुरिति विश्रुतः ॥ वर्णितोऽभूत् व्यूहभेदः; विभवस्तु प्रतन्यते—(147) जगदादिजः—जगतामादिभूतासु मूर्तिष्वन्यतमत्वतः। जातत्वात् विष्णुरूपेण प्रोच्यते जगदादिजः ॥ (148) अनघः—पापप्रतिस्पर्ध्यनघः (149) विजयः—विजयो जगतां जयी ॥ (150) जेता—स्वाभिप्राये स्थापयिता जेता स्याद्विधिशङ्करौ। (151) विश्वयोनिः—विश्वं तत्कार्यवर्गः स्यात् योनिस्तस्य तु कारणम्। ब्रह्मादिमुखतो यः स विश्वयोनिरितीरितः। (152) पुनर्वसुः—ब्रह्मादिष्वपि देवेषु ह्यन्तरात्मतयाऽप्यसौ। पुनर्निवसनान्नित्यं पुनर्वसुरुदाहृतः।

उपेन्द्रो वामनः प्रांशुरमोघश्शुचिरूर्जितः।
अतीन्द्रस्संग्रहस्सर्गो धृतात्मा नियमो यमः ॥ १७ ॥

(153) उपेन्द्रः—इन्द्रस्याप्यनुजत्वेन जातश्चोपेन्द्र उच्यते ॥ (154) वामनः—दृष्ट्या स्वकान्त्या वामानि सुखानि नयतीति सः। वामनःस्यात् (155) प्रांशुः—व्याप्तिमत्त्वात् प्रांशुश्च परिकीर्तितः ॥ (156) अमोघः—बलेश्च वासवस्यापि कृतार्थीकरणात् समम्। मानातीतप्रभावत्वात् अमोघः परिकीर्तितः। न मोघं चेष्टितं यस्य सोऽमोघः परिकीर्तितः। (157) शुचिः—स्वयंकृतोपकारेषु यत्किञ्चित्प्रत्युपक्रियाम्। अन-

पेक्ष्य स्थितो योऽसौ शुचिःस्यात् धर्मदो मनुः। (158) ऊर्जितः—ऊर्जा बलं नित्यमस्य संजातेत्यूर्जितः स्मृतः॥ (159) अतीन्द्रः—इन्द्रानुजत्वेऽप्यैश्वर्यादतीतोऽतीन्द्र उच्यते। (160) संग्रहः—भक्तैरप्यप्रयत्नेन संग्राह्यस्संग्रहः स्मृतः॥ (161) सर्गः—ब्रह्मादिभ्यः सृज्यते यः सर्गं तं परिचक्षते (162) धृतात्मा—येनात्मानो धृता नित्यं स धृतात्मेति कीर्त्यते॥(163) नियमः—नियम्यते जगत् येन नियमः स उदीरितः। (164) यमः—अकण्टकं चानुकूलं यच्छतीत्यखिलं यमः॥

वेद्यो वैद्यस्सदायोगी वीरहा माधवो मधुः।
अतीन्द्रियो महामायो महोत्साहो महाबलः॥ १८॥

(165) वेद्यः—सर्वैश्च वेदितुं शक्यः सौलभ्यात् वेद्य ईरितः। (166) वैद्यः—वेदितृणां भवाख्यस्य गदस्य विनिवर्तनीम्। विद्यामधीते वेदेति यो वैद्यः समुदाहृतः (167) सदायोगी—चिकित्सायां जागरूकः सदायोगीति कथ्यते॥ (168) वीरहा—स्वध्यानभञ्जकान् वीरान् हन्ति यः स तु वीरहा। (169) माधवः—मा विद्या च हरेः प्रोक्ता तस्याः स्वामी धवः स्मृत। तस्मान्माधवनामाऽसौ ब्रह्मविद्याप्रदो मनुः। मौनात् ध्यानाच्च योगाच्च माधवः परिकीर्तित॥ (170) मधुः—भक्तेभ्यो लब्धविद्येभ्यः स्वदमानतया मधुः। (171) अतीन्द्रियः—ज्ञानोपकरणव्रातमतिक्रान्तो ह्यतीन्द्रियः (172) महामायः—माया यस्याप्रपन्नानां सर्वेषामस्ति मोहनी। महामायः स विज्ञेयो वस्वर्णो मनुरुज्वलः॥ (173) महोत्साहः—महदुत्सहनं यस्य ह्यैश्वर्यं कर्तृलक्षणम्। महोत्साहस्स विज्ञेयो मनुरैश्वर्यदायकः॥ (174) महाबलः—कर्त्रन्तरानपेक्षो यः सृष्टेः स स्यान्महाबलः।

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृत्॥ १९॥

(175) महाबुद्धिः—महाबुद्धिर्महत् ज्ञानं स्वरूपं यस्य स स्मृतः॥ (176) महावीर्यः—हेतौ सति विकारित्वेऽप्यविकारित्वलक्षणम्। महद्धि वीर्यं यस्येति महावीर्यश्च स स्मृतः॥ (177) महाशक्तिः—शक्तिश्च महती यस्य महाशक्तिस्स कीर्तितः। (178) महाद्युतिः—

तेजोऽनपेक्षारूपं स्वं महद्यस्य महाद्युतिः ॥ (179) अनिर्देश्यवपुः—ज्ञानादि-षाड्गुण्यमयमुपमानविवर्जितम्। वपुर्यस्यास्ति तेजिष्ठमनिर्देश्यवपुर्हि सः ॥ (180) श्रीमान्—दिव्यभूषणसंपद्भिर्युक्तः श्रीमान् सदा स्मृतः। (181) अमेयात्मा—सिन्धुगम्भीरभावो यो ह्यमेयात्मा स कीर्तितः ॥ (182) महाद्रिधृत्—महान्तं मन्दरं यो हि धृतवान् स महाद्रिधृत्।

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदांपतिः ॥ २० ॥

(183) महेष्वासः—महेष्वासः स विज्ञेयः चण्डकोदण्डमण्डितः ॥ (184) महीभर्ता—धरणीधृतिलीलस्स महीभर्तेति. शब्द्यते। (185) श्रीनिवासः—मथनानीतलक्ष्मीवान् श्रीनिवासः स ईरितः ॥ (186) सतांगतिः—प्रणतानां प्रियकरः सतां गतिरिहोच्यते। (187) अनिरुद्धः—अनन्तचेष्टायुक्तत्वात् अनिरुद्ध उदाहृतः ॥ (188) सुरानन्दः—सुरानन्दः सुरान् सर्वान् आनन्दयति यः सदा। (189) गोविन्दः—गवां स्तुतिगिरां विन्दो गोविन्दः स उदाहृतः ॥ (190) गोविदां पतिः—गावो वेदगिर. प्राज्ञाः गोविदः तत्सुपालनात्। गोविदां पतिरुद्दिष्टो वेदविद्धत्प्रदो मनुः

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥

(191) मरीचिः—अन्धेभ्योऽपि च जन्तुभ्यो हंसरूपावतारतः। प्रकाशितस्वरूपत्वात् मरीचिरिति कथ्यते ॥ (192) दमनः—भवतापस्य दमनात् कान्त्या दमन ईरितः। (193) हंसः—हन्ता संगस्य हसति गच्छतीति मनोहरम्। हंसः॥ (194) सुपर्णः—शोभनपर्णत्वात् सुपर्ण इति कथ्यते। संसारपारनयनात् सुपर्ण इति वा मतः ॥ (195) भुजगोत्तमः—प्रादुर्भावेषु प्रथमः पद्मनाभोऽथ तूच्यते। भुजगस्योत्तमः शेषी भुजगोत्तम उच्यते ॥ (196) हिरण्यनाभः—हिरण्यनाभः सौन्दर्य-नाभिर्यस्येति स स्मृतः (हिरण्यानाभो हेमाद्रिकर्णिकाभोजनाभिकः?)। (197) सुतपाः—तपो बुद्धिः, सैव तनुर्यस्यासौ सुतपाः स्मृतः ॥ (198)

पद्मनाभः—पार्थिवं (?)·भूरिपद्मं तु नाभावष्टदलं महत् । यस्य हेममयी दिव्या कर्णिका मेरुरुच्यते । यस्य नाभौ तदुत्पत्तिः पद्मनाभः स उच्यते । (199) प्रजापतिः—नैमित्तिके तु यत्सृष्टाः प्रजा ब्रह्ममुखास्तथा । तेषां चैष पतिः स्वामी प्रजापतिरिहोच्यते ।

अमृत्युस्सर्वदृक् सिंहस्सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२ ॥

(200) अमृत्युः—नारसिंहमथ स्तौति सर्वमृत्युनिवारणम् । मृत्योर्विरोधिरूपो यो मृत्युमृत्युस्वरूपतः । अमृत्युरिति तं प्राहुः सतार्णो मृत्युनाशकः ॥ (201) सर्वदृक्—अनुकूलान् तटस्थांश्च प्रतिकूलानपि स्वयम् । नियन्तुं च यथायोग्यं यः पश्यति स सर्वदृक् ॥ (202) सिंहः—रिपुद्विपानां निष्पेषभीषणः सिंह उच्यते । (203) संधाता—प्रह्लादाद्यैश्च संधाता संश्लेषकरणाच्च सः ॥ (204) संधिमान्—प्रह्लादाद्यैर्नित्यसंधिर्यस्य स्यात् संधिमान् स्मृतः । (205) स्थिरः—अपचारेऽप्यचाल्यत्वात् संधाने स्थिर उच्यते ॥ (206) अजः—स्तंभजत्वात् इनरवत् अजातत्वादजः स्मृतः । (207) दुर्मर्षणः—दुष्करं मर्षणं यस्य परैर्दुर्मर्षणः स्मृतः ॥ (208) शास्ता—समस्तान् कण्टकान् शास्तीत्यतः शास्तेति कीर्त्यते । (209) विश्रुतात्मा—विस्मयेन श्रुतं देवैः सैंहं यस्यापदानकम् । शीलं तैर्विश्रुतात्मा स महाकीर्तिप्रदो मनुः । (210) सुरारिहा—हिरण्यकशिपोर्हन्ता कीर्त्यते स सुरारिहा ॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ,
निमिषोऽनिमिषः स्रग्वी वाचस्पातिरुदारधीः ॥ २३ ॥

(211) गुरुर्गुरुतमो—अथ मत्स्यावतारस्य प्रस्तावस्तु प्रतन्यते । अशेषविद्याचार्यत्वात् स्मृतो गुरुतमो गुरुः ॥ (212) धाम—चराचराधारतया धामेति परिचक्षते । (213) सत्यः—मन्वादिष्वपि साधुत्वात् सत्य इत्यभिधीयते ॥ (214) सत्यपराक्रमः—वृत्तिर्ह्यकैतवा यस्य स स्यात् सत्यपराक्रमः । (215) निमिषः—विरोधिनः सतां योऽसौ नेक्षते निमिषश्च सः ॥ (216) अनिमिषः—सद्रक्षणे जागरूकः स्मृतो ह्यनिमिषश्च

सः। (217) स्रग्वी—परत्वसूचिनी या च वैजयन्तीति कीर्तिता। तया स्रजा नित्ययोगात् स्रग्वीति परिकीर्त्यते। (218) वाचस्पतिः—वेदोपबृंहणात् वाचस्पतिर्मात्स्यपुराणतः॥ (219) उदारधीः—सर्वोपजीव्यसार्वज्ञ्यादुच्यते स उदारधीः।

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥ २४॥

(220) अग्रणीः—महोदारतया भक्तान् अग्रिमं परमं पदम्। नयतीत्यग्रणीः प्रोक्तो भक्तमोक्षप्रदो मनुः। (221) ग्रामणीः—ग्रामं समाजं सूरीणां नयति ग्रामणीश्च सः॥ (222) श्रीमान् —मत्स्यरूपावतारेऽपि श्रीमान् कमलनेत्रतः। (223) न्यायः—न्यायो हि युक्तकारित्वात् भक्तेष्वेव विशेषतः॥ (224) नेता—भक्तैर्नियुक्तं यत् कर्म नेता तत्करणादपि। (225) समीरणः—भक्तेष्टचेष्टाशीलत्वात् समीरण उदाहृतः॥ (226) सहस्रमूर्धा—सहस्रशब्दो ह्यानन्त्यलक्षकः समुदाहृतः। सहस्रमूर्धा सोऽनन्तशिरस्कः कीर्त्यते ततः। सहस्रमूर्धा स स्याद्वा पुंसूक्ताद्युक्तनामवान्। (227) विश्वात्मा—आभ्याञ्च ज्ञानकर्मभ्यां विश्वात्मा व्यापनात् स्मृतः॥ (228) सहस्राक्षः (229) सहस्रपात्—अक्षिपादपदे ज्ञानकर्मेन्द्रियनिदर्शके। तेनानन्तज्ञानकर्मा सहस्राक्षः सहस्रपात्।

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः।
अहस्संवर्तको वह्निरनिलो धरणीधरः॥ २५॥

(230)आवर्तनः—संसाराख्यघटीयन्त्रे परिवर्तनशीलतः। चक्रवच्च विशेषावर्तन इतीरितः॥ (231) निवृत्तात्मा—त्रिपाद्विभूतिकत्वेन द्विभूतितः। उद्गतात्मस्वरूपत्वात् निवृत्तात्मेति कथ्यते॥ (232) संवृतः—तामसानां तु मूढानां गूढत्वात् संवृतः स्मृतः। (233) मर्दनः—तमसो विद्यया सम्यक् मर्दनात् संप्रमर्दनः॥ (234) संवर्तकः—अहर्लक्षितकालस्य परिवृत्तेश्च साधनम्। अहस्संवर्तक प्राहुर्वेदान्तपारगाः॥ (235) वह्निः—विश्वस्य देशरूपेण वहनात् च्यते। (236) अनिलः—बद्धादेरननात् योऽसावनिलः परिकीर्तितः॥ 237) धरणीधरः—भूतधात्र्याश्च धरणेर्धारणात् धरणीधरः।

सुप्रसादः प्रसन्नात्मा विश्वसृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतस्साधुर्जह्नुर्नारायणो नरः ॥ २६ ॥

(238) सुप्रसादः—प्रसादपरमत्वाच्च सुप्रसादः प्रकीर्तितः ॥ (239) प्रसन्नात्मा—अवाप्तसर्वकामत्वात्, रागादिरहितं मनः । यस्यास्ति स प्रसन्नात्मा चित्ततुष्टिप्रदो मनुः ॥ (240) विश्वसृक्—विश्वं जगत् सृजति यो विश्वसृक् स प्रकीर्तितः । (241) विश्वभुग्विभुः—स सृष्टं व्याप्य वै भुञ्जन् पालयन् विश्वभुग्विभुः ॥ (242) सत्कर्ता—सत्कर्ता च स विज्ञेयः सज्जनप्रतिपूजकः । (243) सत्कृतः—अर्चादिभिः सज्जनैर्यः पूजितः सत्कृतः स्मृतः ॥ (244) साधुः—सेवां सारथ्यदूत्याद्यां साधुः साधयतीति सः । (245) जह्नुः—अभक्तेष्वात्ममाहात्म्यनिह्नुतेर्जह्नुरुच्यते ॥ (246) नारायणः—अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्मृतः । (247) नरः—रः क्षयो यस्य न ह्यस्ति स नरः समुदाहृतः ॥

असंख्येयोऽप्रमेयात्मा विशिष्टश्शिष्टकृच्छुचिः ।
सिद्धार्थस्सिद्धसङ्कल्पस्सिद्धिदस्सिद्धिसाधनः ॥ २७ ॥

(249) असंख्येयः—अगण्यनरसंघो यः सोऽसंख्येयः प्रकीर्तितः । (249) अप्रमेयात्मा—एकैकशोऽप्रमेया या ह्यसंख्याता विभूतयः । तासां चैवाप्रमेयात्मा व्यापनात् बहिरन्ततः । ॥ (250) विशिष्टः—विलक्षणो विशिष्टो यस्सर्वांस्ताननपेक्ष्य सः ॥ (251,252) शिष्टकृच्छुचिः—स्वानुकूलशुभान् कुर्वन् स्वसंबन्धेन तान् स्वयम् । अनाधेयमहादीप्तिः शिष्टकृच्छुचिरुच्यते ॥ (253) सिद्धार्थः—सिद्धाः प्राप्ता यस्य सर्वे ह्यर्थाः सिद्धार्थ ईरितः । अवाप्तसर्वकामो वा सिद्धार्थ इति कथ्यते ॥ (254) सिद्धसंकल्पः—सत्यसङ्कल्पवत्त्वाच्च सिद्धसङ्कल्प ईरितः । (255) सिद्धिदः—सिद्धिदः साधकेभ्यो यो ह्यणिमाद्यष्टसिद्धिदः । (256) सिद्धिसाधनः—तत्सिध्देश्चापि हेतुत्वात् सिध्दिसाधन ईरितः ।

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तश्श्रुतिसागरः ॥ २८ ॥

(257) वृषाही—वृषो हि धर्मस्तद्रूपमहर्यस्य दिनं स्मृतम् । प्रथमाभिगमाहाख्यं वृषाही स प्रकीर्तितः । (258) वृषभः—अभिगच्छद्भक्तजनान् सुधावर्षणतोऽन्वहम् । वृषभश्च समाख्यातः सिञ्चन् भयहरो

मनुः । (259) विष्णुः—विष्णुः स्यादविनाभावाद्व्याप्यव्यापकभावतः ॥ (260) वृषपर्वा—वृषाः वार्णाश्रमा धर्माः पर्वण्यारोहणे तु ते । यस्य सन्ति सदा सोऽयं वृषपर्वा प्रकीर्तितः ॥ (261) वृषोदरः—भक्तैरुपाहृतां पूजामुपहारांश्च धर्मतः । कृत्वोदरे यो जयति स वृषोदर उच्यते ॥ (262) वर्धनः—मातृवज्जठरे कृत्वा भक्तान् वर्धयति स्वयम् । वर्धनः प्रोच्यते नित्यं सप्तार्णो वृद्धिदो मनुः ॥ (263) वर्धमानः—वर्धयंस्तान् स्वयमपि वर्धमानश्च वर्धनः । (264) विविक्तः—लोकोत्तरादिवृत्तान्तात् स्वैकान्ताद्गुणबृंहितात् । विविक्त इति विख्यातः पावनत्वप्रदो मनुः । (265) श्रुतिसागरः—नदीनां सागर इव स्वगुणोक्तिविधाजुषाम् । श्रुतीनामवसानत्वात् कथ्यते श्रुतिसागरः ।

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥

(266) सुभुजः—प्रपन्नभरणे धुर्यभुजौ यः सुभुजस्तु सः ॥ (267) दुर्धरः—परैर्दुर्वारवेगो यो दुर्धरः स च कथ्यते । (268) वाग्मी—वेदलक्षणवक्तृ (वाक्?) त्वात् वाग्मी प्रियहितोक्तितः ॥ (269) महेन्द्रः—परमैश्वर्यवत्त्वेव महेन्द्र इति शब्द्यते । (270) वसुदः—वसुदोन धनदानाच्च धनायद्वयो विशेषतः । (271) वसुः—सर्वस्य वसुरूपत्वात् (वासुदेवः सर्वमिति ?)धनं यस्माद्वसुस्ततः । (272) नैकरूपः—यस्सदा बहुरूपश्च नैकरूपस्स कीर्तितः ॥ तत्तज्जनध्यानयोग्यं रूपं यस्य विशेषतः । नैकरूपः समुद्दिष्टः सर्वप्रत्ययगोचरः ॥ (273) बृहद्रूपः—व्याप्तवत् यस्य रूपं तु बृहद्रूपस्स कीर्तितः । (274) शिपिविष्टः—शिपयो रश्मयः प्रोक्ताः व्याप्य तेष्वपि वर्तनात् । शिपिविष्टस्समाख्यातः सूर्येन्द्वग्न्यादिरूपवत् । (275) प्रकाशनः—विश्वरूपं दिदृक्षुभ्यः पार्थादिभ्यो विशेषतः । रूपं प्रकाशयति यस्स प्रकाशन ईरितः ।

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धस्स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३० ॥

(276) ओजस्तेजोद्युतिधरः—असाधारणसामर्थ्यं बलमोजः प्रचक्षते । पराभिभवसामर्थ्यं तेजश्च परिपठ्यते । कीर्तिर्वा द्युतिरौज्ज्वल्यं

तानि धत्ते च यः सदा । ओजस्तेजोद्युतिधरो ह्येकनामा प्रकीर्तितः । (277) प्रकाशात्मा—मूर्खैरपि सदा सम्यक् प्रतिपन्नस्वभाववान् । यस्तु स्यात् स प्रकाशात्मा । (278) प्रतापनः—तीक्ष्णभावः प्रतापनः । (279) ऋद्धः—पार्वणो जलधिर्यद्वत् वृद्धिमान् ऋद्ध उच्यते ॥ (280) स्पष्टाक्षरः—स्पष्टीकृताश्च वेदार्णा यस्मात् स्पष्टाक्षरस्ततः । (281) मन्त्रः—मन्तारं त्रायत इति मन्त्रश्चाप्यभिधीयते ॥ (282) चन्द्रांशुः—क्रमहारिमहाह्लादतेजस्करतयाऽपि च । मन्तॄणामेव चन्द्रांशुराह्लादफलदो मनुः ॥ (283) परप्रभावाभिभवलक्षणद्युतिमांश्च यः । स भास्करद्युतिः प्रोक्तो नेत्रवैमल्यदो मनुः ॥

अमृतांशूद्भवो भानुश्शशबिन्दुस्सुरेश्वरः ।
औषधं जगतस्सेतुस्सत्यधर्मपराक्रमः ॥ ३१ ॥

(284) अमृतांशूद्भवः—सर्वतापहरस्यैव मृतसञ्जीवनस्य च अमृतांशोर्हि तज्जत्वादमृतांशूद्भवः स्मृतः ॥ (285) भानुः—रवेस्तेजस्करत्वाच्च भानुरित्यभिधीयते । (286) शशबिन्दुः—शशः प्लुतगतिः प्रोक्तो बिन्दुस्तस्य निवर्तकः । कौटिल्यगतिविध्वंसी शशबिन्दुरुदाहृतः । (287) सुरेश्वरः—धर्ता ऋजुगतीनां यः स सुरेश्वर ईरितः ॥ (288) औषधम्—भवतीव्रविषं हर्ता ह्यौषधं यस्स उच्यते । (289) जगतस्सेतुः—निरोधात् जगतस्सेतुस्सदसद्वर्गसंगतेः ॥ (290) सत्यधर्मपराक्रमः—सत्या ह्यवितथा धर्मा गुणा यस्य पराक्रमः । चेष्टितानि च सन्तीति सत्यधर्मपराक्रमः ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः ॥ ३२ ॥

(291) भूतभव्यभवन्नाथः—ऐश्वर्यं स्वाम्यमथ वा त्रिषु कालेषु यस्य सः । भूतभव्यभवन्नाथः इत्युक्तस्सद्भिरादरात् ॥ (292) पवनः—यतः स्वयं तु सर्वत्र प्रवहत्येष नित्यशः । प्रवाहः पवनस्तस्मात् कथ्यते वेगदो मनुः ॥ (293) पावनः—यः स्वसंबन्धिगङ्गादीन् पावयेत् लोकपावनान् । स पावन इति ख्यातः पावनत्वप्रदो मनुः ॥ (294) अनलः—अपर्याप्तो हि भक्तेभ्योऽप्युपकृत्य पुनःपुनः । अनुग्रहं यः करोति

सोऽनलः परिकीर्तितः ॥ (295) कामहा—पुंसां स्वदर्शिनां योऽसौ स्पृहां च विषयान्तरे। हतवान् कामहा प्रोक्तः सर्वाशापूरको मनुः ॥ (296) कामकृत्—स्वपादपद्मे रागादिकरणात् कामकृत् स्मृतः। (297) कान्तः—सौन्दर्यादिगुणैः कान्तः (298) कामः—कामो भृशमनोहरः ॥ (299) कामप्रदः—स्वकामक्षुद्रकामेभ्यो यथार्हं काम्यदानतः। कामप्रदस्समाख्यातो ह्यष्टार्णो मनुरुत्तमः ॥ (300) प्रभुः—सर्वेषां चित्तहरणे प्रभुः प्रभवतीति सः।

युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ३३ ॥

(301) युगादिकृत्—न्यग्रोधशायी भगवान् पुराणपुरुषोत्तमः। करोत्यादिं युगस्यान्ते स युगादिकृदीरितः। (302) युगावर्तः—धर्मव्यवस्थया स्वस्य युगाद्यावर्तनान्मुहुः। युगावर्तः समाख्यातः कालरूपधरो हरिः। (303) नैकमायः—मुग्धार्भकत्वरूपेण जगन्निर्भरणादपि। वटैकपत्रशयनात् निरालम्बजले मुहुः। अनन्ताश्चर्यसंयुक्तो नैकमायस्तु स स्मृतः। (304) महाशनः—भुवनानां निगरणात् महाशन इतीरितः। (305) अदृश्यः—अतर्क्यवृत्तान्ततया जगतः प्रलयेऽपि यः। न लभ्यश्चिन्त्यमानोऽपि सोऽदृश्य इति कथ्यते (306) व्यक्तरूपः—महाजले संचरतो मार्कण्डेयस्य धीमतः। दृश्यो यो व्यक्तरूपत्वात् दिव्यविग्रहधारणात्। (307) सहस्रजित्—सहस्रयुगसंख्याकं कल्पं स त्वान्तमेव हि। शयान एव जयति सहस्रजिदिति स्मृतः। (308) अनन्तजित्—मितस्य शिशुरूपस्य कदाचित् कश्चिदेव च। कथञ्चिदवधिर्नास्ति महिम्नः परमात्मनः। तस्मादनन्तजिदिति वस्वर्णो जयदो मनुः ॥

इष्टोऽविशिष्टश्शिष्टेष्टः शिखण्डी नहुषो वृषः।
क्रोधहा क्रोधकृत् कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥

(309) इष्टः, (310) अविशिष्टः—इष्टोऽविशिष्टः कथितः सर्वरक्षणतत्परः। (311) शिष्टेष्टः—मार्कण्डेयद्विजादीनां पण्डितेष्वग्रयायिनाम्। उत्कृष्टपुरुषार्थत्वेनेष्टः शिष्टेष्ट उच्यते। (312) शिखण्डी—

अत्यप्रधृष्यमैश्वर्यं परं यस्तेज आस्थितम् । तच्छिखण्डं तु यस्यास्ति तं शिखण्डीति चक्षते । 313) नहुषः—जीवान् स्वमायया नित्यं नहुषो नह्यतीति सः । (314) वृषः—सागरस्योदरे नित्यं वसन् अमृतरूपया । स्वदेहकान्त्या वाचापि सम्यगाश्वासयन् मुहुः । बहुशः सिञ्चति तु यः वृषः स परिपठ्यते । (315) क्रोधहा—काश्यपस्य प्रार्थनया यः क्रोधं क्षत्रहानिदम् । हतवान् क्रोधहा प्रोक्तः षड्वर्णः क्रोधनाशकः । (316) क्रोधकृत्—क्रोधकृत् क्षत्रियेभ्यो यः पुरा क्रोधं करोति सः ॥ (317) कर्ता—क्रुद्धतोः कार्तवीर्यस्य च्छेत्ता कर्तेति शब्द्यते । (318) विश्वबाहुः—विश्वस्मै यस्य बाहू स विश्वबाहुः प्रकीर्तितः ॥ (319) महीधरः—भारावतरणं कृत्वा गां धत्ते स महीधरः ।

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥

(320) अच्युतः—च्यवनोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु । यस्मान्न च्यवते स्थानात् तस्मात् सङ्कीर्त्यतेऽच्युतः ॥ साधर्म्येणावतारेऽपि ब्रह्मेन्द्रवरुणादिभिः । न स्वैश्वर्यात् प्रच्युतो यः सोऽच्युतः परिकीर्तितः ॥ (321) प्रथितः—अच्युतत्वेन लोकेऽस्मिन् प्रख्यातः प्रथितः स्मृतः । (322) प्राणः—पुंसां जीवितरूपत्वात् प्राण इत्यभिधीयते ॥ (323) प्राणदः—मरुतां बलदानाद्धि समुद्रमथने भृशम् । प्राणदश्च समुद्दिष्टः कूर्मरूपतया हि सः (324) वासवानुजः—वासवस्यानुजत्वेन जातत्वात् वासुवानुजः ॥ (325) अपांनिधिः—अपां निधिर्मथ्यमानमहार्णवविधारणात् । (326) अधिष्ठानम्—भ्रम्यमाणं मन्दराद्रिं धृतवान् यो महाजणे । अधिष्ठानं तमेवाहुरधिष्ठानप्रदो मनुः । (327) अप्रमत्तः—अत्यन्तावहितस्त्राणे ह्यप्रमत्तः प्रकीर्तितः ॥ (328) प्रतिष्ठितः—स्वे महिम्नि स्थितो यस्तु स प्रतिष्ठत उच्यते ॥

स्कन्दःस्कन्दधरो धुर्यो वरदो वायुवाहनः
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६

(329) स्कन्दः—असुरादीन् शोषयति स्कन्दः स्कन्दयतीति यः ॥ (330) स्कन्दधरः—स स्कन्दधर आख्यातः षडाननविधारणात् । (331) धुर्यः—भुवनं धृतवान् धुर्यः (332) वरदः—वरदोऽभीष्टदः स्मृतः ॥

(333) वायुवाहनः—जगत्प्राणं वहति यो वायुवाहन उच्यते। (334) वासुदेवः—सर्वं भूतं वासयति वासुस्स परिकीर्तितः॥ दिवुधातोरपि क्रीडाद्यर्थकत्वाद्विशेषतः। वासुश्च देवश्चेत्येष वासुदेवः प्रकीर्तितः॥ सर्वभूतेष्वपि वसन् स्वस्मिन् भूतानि वासयन्। यः क्रीडति मुदा यद्वा वासुदेवः स उच्यते॥ सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते॥ (335) बृहद्भानुः—बृहन्तो भानवो यस्य स बृहद्भानुरुच्यते। (336) आदिदेवः— क्रीडतीत्यादिदेवः स पादात्मकविभूतिभिः॥ (337) पुरन्दरः—पुरन्दर इति ख्यातोऽसुराणां पुरदारणात्।

अशोकस्तारणस्तारश्शूरश्शौरिर्जनेश्वरः।
अनुकूलश्शतावर्तः पद्मी पद्मनिभेक्षणः॥ ३७॥

(338) अशोकः—अशोकः शोकमोहादिनाशकः परिकीर्तितः॥ (339) तारणः—तारणोयस्तारयति वैरिव्याघ्रादिभीतितः। (340) तारः—तारः संसारभयतो नित्यं तारयतीति सः॥ (341) शूरः—विजिगीषुतया जैत्रः समर्थः शूर उच्यते। (342) शौरिः—शूरस्य वसुदेवस्य योऽपत्यं शौरिरुच्यते॥ (343) जनेश्वरः—प्लवनोज्ज्वलनैः महौघः स्याज्जनेश्वरः। (344) अनुकूलः—स्वभावतो महत्त्वेऽपि विस्मयवर्जनात्। भक्तैकप्रवणो नित्यमनुकूल इति स्मृतः। (345) शतावर्तः—ऐश्वर्यजृम्भिताभिख्या आवर्ता यस्य नित्यशः। शतं सन्ति शतावर्तो वस्वर्णो भुक्तिमुक्तिदः। (346) पद्मी—गुणतो वासुदेवत्वमुक्तं रूपादिरुच्यते। लीलापद्मधरो नित्यं पद्मीति परिकीर्त्यते। (347) पद्मनिभेक्षणः—स्वच्छाम्बुजातसदृशमीक्षणं श्रमहारि च। यस्यास्ति भक्तरक्षायां स स्यात् पद्मनिभेक्षणः॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भश्शरीरभृत्।
महर्द्धि ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥ ३८॥

(348) पद्मनाभः—नाभिश्च पद्मवद्यस्य पद्मनाभः स उच्यते। (349) अरविन्दाक्षः—रक्तारविन्दनयनस्त्वरविन्दाक्ष ईरितः॥ (350) पद्मगर्भः—योगिहृत्पुण्डरीकस्थः पद्मगर्भः स उच्यते॥ (351) शरीरभृत्—

योगिहृत्कञ्जमध्यस्थः स्वदेहं तं बिभर्ति यः। शरीरभृत् स कथितो वस्वर्णो भुक्तिमुक्तिदः ॥ (352) महर्द्धिः—स एवाथो विव्रियते वासुदेवो विभूतिभिः। तद्योगक्षेमवहननिर्मर्यादविभूतितः। महर्द्धिः (353) ऋद्धः—तत्समृद्ध्या यस्समृद्धस्त्वृद्ध उच्यते। (354) वृद्धात्मा—महिमानं चुलकयन् प्रवृद्धस्सर्वतोऽधिकम्। आत्मा स्वरूपं यस्येति स वृद्धात्मेति कथ्यते। (355) महाक्षः— अक्षस्तु तार्क्ष्यो वहनात् रथावयवसाम्यतः। मतहान् पूज्यः स यस्यास्ति स महाक्ष इति स्मृतः। (356) गरुडध्वजः—स एव तु ध्वजो यस्य स उक्तो गरुडध्वजः ॥

अतुलश्शरभो भीमस्समयज्ञो हविर्हरिः।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९ ॥

(357) अतुलः—गरुडध्वजवत्त्वाद्धि सोऽतुलोऽनुपमः स्मृतः। (358) शरभः—स्वाज्ञातिलङ्घिनः पुंसः शिक्षणात् शरभः स्मृतः ॥ (359) भीमः—भीमो यस्मात् बिभ्यति तु शरभात् पवनादयः। (360) समयज्ञः—अग्न्यादीनां च समयमूर्ध्वाग्रज्वलनादिकम्। यो जानात्यधिकारं स समयज्ञः प्रकीर्तितः। (361) हविर्हरिः—भक्तेभ्यः स्वात्मदानाय यो ज्ञात्वाऽवसरं मुदा। दीयते चाऽऽदीयते च तैर्योऽसौ तु हविः स्मृतः। हरिश्च तद्विघ्नहरो यद्वा क्रतुषु दीयते। यत् हविस्तस्य हरणात् हविर्हरिरिति स्मृतः ॥ (362) सर्वलक्षणलक्षण्यः—सर्वलक्षणलक्षण्यो लक्ष्मीलक्षणचिह्नितः(?) ॥ (363) लक्ष्मीवान्—लक्ष्म्या च नित्ययुक्तत्वाल्लक्ष्मीवानिति कथ्यते। (364) समितिञ्जयः—चेतनानां स्वदासत्वविवादं जयतीति सः। समितिंजय आख्यातः सर्वदुःखशमाश्रयः ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरस्सहः।
महीधरो महाभागो वेगवान् अमिताशनः ॥ ४० ॥

(365) विक्षरः—उक्तस्नेहस्याक्षरणात् विक्षरः परिकीर्तितः। (366) रोहितः—पद्मस्य गर्भभतया रोहितः परिकीर्तितः। (367) मार्गः—उपासकैर्मार्ग्यमाणो मार्गो वाञ्छितसिद्धये। (368) हेतुः—वाञ्छितार्थनिदानत्वात् हेतुरित्यभिधीतते ॥ (369) दामोदरः—दामानि

लोकनामानि ह्युदरे यस्य सन्ति सः। दामोदरो मतो यद्वा यशोदादाम-बन्धनात्। देवानां सुखशंसित्वात् दामात् दामोदरोऽपिवा। (370) सहः—यशोदाकृतबन्धादिसहनात् सह ईरितः ॥ (371) महीधरः—भूभारनाशनेन ज्याधरणात् धरणीधरः । (372) महाभागः—रुक्मिण्यादिबहुस्त्रीभिर्महाभागः स्वयं वृतः ॥ (373) वेगवान्—दुर्वारपरमैश्वर्यप्रसरत्वाद्विशेषतः । मनुष्यधर्मे बाल्येऽपि वेगवानिति शब्द्यते ॥ (374) अमिताशनः—इन्द्राय कल्पितं गोपैरमितं त्वाशनं स्वयम्। भुक्तवान् यश्च निश्शेषं प्रोच्यते सोऽमिताशनः ॥

उद्भवः क्षोभणो देवश्श्रीगर्भः परमेश्वरः।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥

(375) उद्भवः—समुद्गतो भवो यस्मादुद्भवः परिकीर्तितः। (376) क्षोभणः—प्रकृतिं बन्धनार्हांश्च क्षोभयन् क्षोभणः स्मृतः ॥(377) देवः—व्याघ्रादिवत् जीवततेर्मायापाशेन बन्धनम्। कृत्वा नित्यं क्रीडति यः स देवः परिकीर्तितः ॥ (378) श्रीगर्भः—श्रीगर्भः श्रीयेन भोगक्रीडासाहेन पोष्यते । (379) परमेश्वरः—श्रीस्वयंग्रहसार्थात् स्वादैश्वर्यात् परमेश्वरः ॥ (380) करणम्—स्वप्राप्तौ साधकतमं जीवानां करणं विदुः। (381) कारणम्—जीवानां चक्षुरादीन् यो हेतून् कारयतीति सः। प्रोच्यते कारणम्। (382) कर्ता—कर्ता स्वतन्त्रः परिकीर्तितः ॥ (383) विकर्ता—विकुर्वाणो विकर्ता यो हर्षशोकादिभिः स्मृतः । (384) गहनः—बुद्ध्यायतन भोगोपकरणादिषु देहिनाम्। तदभिन्नाभिमानात्म-महागुणगणेऽपि च । गहनो ह्यतिभूमित्वात् (385) गुहः—रक्षतीति गुहः स्मृतः ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टश्शुभेक्षणः ॥ ४२ ॥

(386) व्यवसायः—ज्योतिश्चक्रं ध्रुवे नित्यं सीयते बद्ध्यते यतः। व्यवसायस्ततो ज्ञेयो भगणाधारमूर्तिमान् ॥ (387) व्यवस्थानः—कलामुहूर्तादिमयो ध्रुवे कालोऽवतिष्ठते। यस्मात् तस्मात् व्यवस्थानो ह्युत्तानः स्थानदो मनुः ॥ (388) संस्थानः—ध्रुवे (तस्मिन्) समाप्यते सर्वमिति संस्थान उच्यते। (389) स्थानदः—स एव परमाकाशप्राप्तौ हेतु-

त्वतः सदा। प्रोच्यते स्थानद इति सप्तार्णो मनुनायकः। (390) ध्रुवः—अर्वाचीनं ध्रुवमपि तुङ्गस्थानप्रदानतः। ध्रुवीचकार यस्माद्धि ध्रुवस्तस्मात् प्रकीर्तितः। (391) परर्द्धिः—कल्याणानां पराणां च गुणानामृद्धिदस्सदा। परावस्थतया चैव परर्द्धिरिति कथ्यते। (392) परमस्पष्टः—साक्षात् दृष्टस्वपारम्यः परमस्पष्ट उच्यते॥ (393) तुष्टः—लाभात् दाशरथित्वस्य जगतः पालनस्य च। मनुष्यत्वेऽपि यः प्रीतः स तुष्ट इति कथ्यते॥ (394) पुष्टः—गुणैर्यो ह्यानृशंस्याद्यैः पूर्णः पुष्ट इतीरितः। (395) शुभेक्षणः—सौशील्यैश्वर्यपिशुनं शीतलं दीर्घमायतम्। ताम्रं च लोचनं यस्य स शुभेक्षण ईरितः॥

रामो विरामो विरतो (जो) मार्गो नेयो नयोऽनयः।
वीरश्शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः॥ ४३॥

(396) रामः—शुभेक्षणेऽस्मिन् स्वगुणै रम्यते राम ईरितः। (397) विरामः—वरप्रदैर्ब्रह्ममुख्यैरवध्यत्वादिभिर्वरैः। यस्मिन् विरम्यत इति स विरामः प्रकीर्तितः। (398) विरतः—निसर्गनैरपेक्ष्येण राज्यादेः कृपणाद्धि यः। विरागी विरतः स स्यात् सप्तार्णः परमाद्भुतः। (399) मृग्यमाणतया मार्गो भरद्वाजादिभिः सदा॥ (398) पाठे तु विरजोमार्ग इति पन्थाः प्रदर्शितः। निर्दोषो येन विरजोमार्गस्सन्मार्गदर्श्यसौ। (400) नेयः—नियोगयोग्यः सुहृदां योऽसौ नेयस्स उच्यते। (401) नयः—यस्मिन् तपोधना नित्यं नीयन्त इति वै नयः॥ (402) अनयः—असुहृद्भिर्नयो यस्य नास्तीत्यनय उच्यते। अथवा जगतामस्मात् अयो नान्यस्ततोऽनयः। (403) वीरः—वीरः कम्पनहेतुत्वात् रक्षसामतिभीमतः। (404) शक्तिमतां श्रेष्ठः—सुरादीनां शक्तिमतां यः प्रशस्यतमः स्मृतः। तस्माच्छक्तिमतां श्रेष्ठो दशार्णः श्रेष्ठदो मनुः। (405) धर्मः—निःश्रेयसाभ्युदयतो धर्मः सर्वस्य धारणात्॥ (406) धर्मविदुत्तमः—वसिष्ठाद्युपजीव्यो यो धर्मे धर्मविदुत्तमः।

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः॥ ४४॥

(407) वैकुण्ठः—संश्लेषप्रतिघातश्च कुठिधात्वर्थ उच्यते। विगतः स च येषां ते विकुण्ठाः स्युरुदीरिताः। तेषामेवैष इति हि वैकुण्ठः

परिकीर्तितः ॥ (407) पुरुषः—'स यत्पूर्वं' इति श्रुत्या पुरुषः पावनत्रतः। पृधातोः पालनार्थाद्धि कुषन्प्रत्यययोगतः। सर्वपालकतालब्ध्या पुरुषः प्रोच्यते बुधैः। (408) प्राणः—प्राणः सर्वप्राणनाद्धि (409) प्राणदः—तद्दानात् प्राणदः स्मृतः। (410) प्रणमः—गुणैश्चराचराणां हि नामनात् प्रणमः स्मृतः। (411) पृथुः—यशोविस्तारवत्त्वाच्च पृथुरित्युच्यते बुधैः ॥ (412) हिरण्यगर्भः—हितस्य रमणीयस्य ध्यातॄणां हृदयस्य हि। हिरण्यगर्भस्त्वन्तःस्थः स शुभाश्रयणः स्मृतः॥ यद्वा हिरण्गर्भोऽसौ हिरण्यनिधिसाम्यतः। (413) शत्रुघ्नः—शत्रून् इन्द्रियवर्गान् यो हन्ति शत्रुघ्न उच्यते ॥ (414) व्याप्तः—नीचपूज्याविशेषेण व्यापनात् व्याप्त उच्यते। (415) वायुः—तत्र तत्र स्थितान् सर्वान् भरद्वाजगुहादिकान्। गच्छति स्वयमेवैतान् स वायुरिति शब्द्यते। (416) अधोक्षजः—सदोपभुज्यमानोऽपि सर्वैरमृतसिन्धुवत्। अधो न क्षीयते जातु यस्मात् तस्मादधोक्षजः।

ऋतुस्सुदर्शनः कालः परमेष्ठी परिग्रहः।
उग्रस्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥

(417) ऋतुः—ऋच्छतीति ऋतुः प्रोक्तः सर्वोल्लासकरैर्गुणैः ॥ (418) सुदर्शनः—मन्दानां च शुभं यस्य दर्शनं स सुदर्शनः। (419) कालः—चराचराणां कलनात् कालः स्वस्मिन् गुणैरसौ ॥ (420) परमेष्ठी—परे पदे स्थितत्वाच्च परमेष्ठी प्रकीर्तितः। (421) परिग्रहः—इहामुत्र समं सर्वग्रहणात् स्यात् परिग्रहः ॥ (422) उग्रः—नष्टे धर्मे कल्किरूपो ह्यवतीर्य महीभृतः। म्लेच्छादीन् हतवान् योऽसावुग्र इत्युच्यते बुधैः ॥ (423) संवत्सरः—संहारस्योपकरणैस्साकं कालप्रतीक्षया। संवत्सरः स्यात् पातालेऽनन्ते संवसतीति सः ॥ (424) दक्षः—शीघ्रार्थत्वाद्दक्षधातोः निमेषाद्दस्यवो हताः। येन सोऽयं शीघ्रकारी दक्ष इत्युच्यते बुधैः ॥ (425) विश्रामः—पापानि तत्फलान्येवं श्रान्ता भोक्तुं च ये जनाः। तेषां विश्रामभूमित्वात् विश्रामः परिकीर्तितः। (426) विश्वदक्षिणः—अपकारिष्वतिक्षान्तो विश्वदक्षिण उच्यते। यद्वाऽश्वमेधे पृथिवीं दक्षिणात्वेन दत्तवान्। महीसुरेभ्यः कृत्स्नां यः स स्मृतो विश्वदक्षिणः ॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्
अर्थोऽनर्थो

(427) विस्तारः—प्रबलं यः कलिं हत्वा प्रवर्त्य च कृतं युगम्। विस्तार्य वेदमर्यादां स्थितो विस्तार उच्यते। (428) स्थावरस्थाणुः—स्थावरीकृत्य धर्मान् यः शमे स्थास्यति नित्यशः। येन केनाप्यचाल्यः स स्थावरस्थाणुरुच्यते। (429) प्रमाणम्—हिताहितस्थापकत्वात् प्रमाणं स्यात् कृतादिषु॥ (430) बीजमव्ययम्—यो वै कलियुगस्यान्ते मुहुर्धर्मप्ररोहणम्। करोति भक्तरक्षार्थं स भवेत् बीजमव्ययम्॥ (431) अर्थः—परमैकान्तिभिर्नित्यमेषणात्रयवर्जितैः। स्वयंप्रयोजनतया प्राप्यमाणोऽर्थ उच्यते॥ (432) अनर्थः—अर्थार्थिनाऽल्पभाग्येन निर्व्यर्जिनार्थ्य(र्य) ते यतः। तस्मादनर्थनामाऽसौ वेदविद्भिः प्रकीर्तितः। (433) महाकोशः—शङ्खपद्मादिनिधयो महान्तो रोहणो गिरिः। कोशा भाण्डगृहा यस्य महाकोशः स उच्यते॥ (434) महाभोगः—अर्थसाध्यः कामभोगो यस्मादेषां महानिति। महाभोगः स विज्ञेयो ह्यष्टार्णश्चिन्तितार्थदः। (435) महाधनः—अनिरूप्याऽऽतिकृपणप्रदेयं धनमक्षयम्। अस्यैवास्तीति सततं स महाधन ईरितः॥

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामस्समीहनः॥ ४७॥

(436) अनिर्विण्णः—अनिर्विण्णो जागरूको जगद्व्यापारसन्ततौ॥ (437) स्थविष्ठः—शिंशुमाराकृतितया तारारूपेण सर्वदा। स्थौल्यात् स्थविष्ठः संप्रोक्तः सप्तार्णः पापनाशनः। (438) भूः—औत्तानपादिसंबन्धात् सर्वाधारतया तथा। भवतीति च भूः प्रोक्तो भक्तानां भूतिदो मनुः। (439) धर्मयूपः—उत्तमाङ्गतया धर्मतत्त्वं यौतीति सर्वदा। धर्मयूपः समाख्यातो ह्यष्टार्णो धर्मदायकः। (440) महामखः—धर्मदेहतया पूज्यो यज्ञोऽस्यावयवो यतः। ततो महामखः प्रोक्तो ह्यष्टार्णः कर्मकारकः। (441) नक्षत्रनेमिः—यो नक्षत्रात्मकं चक्रं ज्योतीरूपमनामयम्। नयति भ्रामयति यं भ्रमन्तमनुयाति तत्। नक्षत्रनेमिः स ज्ञेयो नवार्णो भ्रमनायकः॥ (442) नक्षत्री—शिंशुमाराकृति प्रोक्त यद्रूपं ज्योतिषां दिवि।

तद्यस्यास्ति स नक्षत्री सप्तार्णो लोकपावनः ॥ (443) क्षमः—अना-यासेन निखिलं भारं च भुवनस्य यः । सहते स क्षमः प्रोक्तः षडर्णः क्षान्तिदायकः ॥ (444) क्षामः—अवान्तरलये कैश्चित् क्षीणः तारागणैः स्मृतः । क्षामो ध्रुवसमीपस्थः चतुर्नक्षत्रसंयुतः ॥ (445) समीहनः—स्वस्वाधिकारे सर्वान् यः समीहयति सृष्टिषु । समीहनः स विज्ञेय-स्त्वाष्टार्णः कार्यदायकः ।

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतांगतिः ।
सर्वदर्शी निमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥

(446) यज्ञः—यज्ञाराध्यतया यज्ञः (447) इज्यः—इज्यः कर्मभि-रर्चितः ॥ (448) महेज्यः—इज्या हि महती यस्य स महेज्य उदाहृतः ॥ (449) क्रतुः—अग्निष्टोमादयः सप्त संस्थाः क्रतव ईरिताः । आराध्यः क्रियते तैरित्यसौ क्रतुरुदीरितः ॥ (450) सत्रम्—अनेकयजमाने च दीर्घे आसादिचोदिते । सत्रे तैराराध्यतया सत्रं स्यात् सीदतीति सः । (451) सतांगतिः—निवृत्तिधर्मनिष्ठानां गतिर्यः स सतां गतिः । (452) सर्वदर्शी—धर्माधर्मौ च तौ सर्वौ अध्यक्षयितुमादरात् । सर्वदा शीलमस्येति सर्व-दर्शी ततः स्मृतः । (453) निवृत्तात्मा—निवृत्तिधर्माचार्यत्वात् विषये-भ्यो निवृत्तिमत् । मनो यस्य निवृत्तात्मा नरनारायणात्मकः । (454) सर्वज्ञः—सर्वात्मना स्वमात्मानं यश्च जानाति केवलम् । सर्वज्ञः स तु विज्ञेयस्सप्तार्णो ज्ञानदो मनुः । (455) ज्ञानमुत्तमम्—परश्च वैष्णवो धर्मः सर्वोऽस्मिन् ज्ञायते यतः । सर्वेषां श्रेयसां मूलं तत् ज्ञेयं ज्ञानमुत्तमम् ।

सुव्रतस्सुमुखस्सूक्ष्मः सुघोषस्सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥

(456) सुव्रतः—भक्तार्थं व्रतवान् योऽसौ सुव्रतस्स प्रकीर्तितः ॥ (457) सुमुखः—ध्यातॄणां सुप्रसन्नं यन्मुखं स सुमुखः स्मृतः । (458) सूक्ष्मः—सूक्ष्मो दुःसाधयोगैकलक्ष्यसूक्ष्मस्वरूपतः ॥ असु-खवथवा गूढाभिप्रायः सूक्ष्म उच्यते । (459) सुघोषः—ध्यायघोषो यस्यास्ति सुघोषः स तु कीर्तितः ॥ (460) सुखदः—

समाध्यनुष्ठापनेन तदनुष्ठानशीलिनाम्। सुखं बहु ददातीति सुखदः परिकीर्तितः ॥ (461) सुहृत्—किमस्मिन् करवाणीत्यप्यपकारिणि शोभनम्। यस्यास्ति हृदयं सोऽयं सुहृदित्यभिधीयते ॥ (462) मनोहरः—एवं निसर्गसौहार्दात् तेषां हृदयहारकः। मनोहरः समाख्यातो ह्यष्टार्णः शान्तिदायकः ॥ (463) जितक्रोधः—रक्षसां देवविषये येन क्रोधो विनिर्जितः। स जितक्रोध आख्यातो ह्यष्टार्णः क्रोधनाशकः ॥ (464) वीरबाहुः—विक्रान्ता बाहवो यस्य वीरबाहुस्तु स स्मृतः। (465) विदारणः—आयुधैर्दारुणैर्दिव्यैर्दारणाच्च विदारणः ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥

(466) स्वापनः—कटाक्षभ्रूविलासाद्यैः नष्टशिष्टान् जनानपि। योऽसौ सम्यङ् मोहयति स्वापनः परिकीर्तितः ॥ (467) स्ववशः—स्वकीयैस्सह सुप्तेषु तेषु स्वैरविहारवान्। भवति स्ववशः सोऽन्यानाधीनत्वप्रदो मनुः ॥ (468) व्यापी—देवरक्षोमन्दरेषु वासुकिप्रभृतिष्वपि। आप्यायनाय शक्त्या च व्यापी स्याद्व्यापनादसौ। (469) नैकात्मा—तदातनैर्ब्राह्मकौर्ममोहिन्याद्यवतारकैः। नैकात्मेति श्रुतः सम्यक् मुन्यर्णो मनुरूपदः ॥ (470) नैककर्मकृत्—समुद्रमथनेऽनेककर्मकृन्नैककर्मकृत्। (471) वत्सरः—पुरुषार्थस्थापनाय सर्वान्तर्वसनाच्च यः। धर्मात्मा वत्सरः स स्यात् मुन्यर्णोऽभीष्टदो मनुः ॥ (472) वत्सलः—सर्वस्यान्तर्निवसने तस्य हेतुरथोच्यते। वत्से यतो धेनुरिव वत्सलः शरणागते ॥ (473) वत्सी—नित्यपोष्यात्मवर्गाख्यवत्सभूयस्त्वतस्सदा। वत्सी स्याद्धि विशेषेण षडर्णो गोप्रदो मनुः। (474) रत्नगर्भः—धनायद्भ्यो यथाकामं प्रदेयधनवत्त्वतः। रत्नगर्भः समाख्यातो ह्यष्टार्णो धनदो मनुः। 475) धनेश्वरः—तत्तदिष्टद्रव्यदाने शीघ्रकारी धनेश्वरः ॥

धर्मगुब्धर्मकृद्धर्मी सदक्षरमसत् क्षरम्।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥

(476) धर्मगुप्—कामं दत्वाऽप्यर्थकामौ निवर्त्य विषयान्तरात्। ताभ्यां हितस्य धर्मस्य रक्षणात् धर्मगुप् स्मृतः ॥ (477) धर्मकृत्—

सर्वं जनं धार्मिकयन् लीलानुग्रहलक्षणम्। धर्मं करोति यस्माद्धि तस्मात् धर्मकृदुच्यते ॥ (478) धर्मी—साधारणोपकरणं धर्मो यस्यास्ति केवलम्। स वै धर्मीति विज्ञेयः षडर्णो धर्मदो मनुः ॥ (479) सत्—निरुपाधिकसद्भावान्नित्यसाद्गुण्ययोगतः। सच्छब्देनोच्यते विष्णुः वेदवेदान्तपारगैः ॥ (480) अक्षरम्—अपक्षयविनाशादिवर्जितोऽक्षर उच्यते। ततोऽक्षरसदित्येवमेकनाम च शस्यते ॥ (481) असत्—असतां यः सदाऽनन्तभवाख्याघप्रदानतः। असदित्युच्यते सद्भिः (482) क्षरम्—तादृक्क्षरमसत् क्षरम् (483) अविज्ञाता—प्रपन्नकृतपापानां किञ्चिदप्यविचारणात्। अविज्ञातेति कथितः बुधैस्तद्गुणपारगैः ॥ (484) सहस्रांशुः—अंशवो बुद्धयः प्रोक्ताः सहस्रं सन्ति यस्य ते। सहस्रांशुरिति ख्यातो ह्यष्टार्णो धीप्रदो मनुः ॥ (485) विधाता—तादधीन्यात् यमादीनां विधातेत्युच्यते बुधैः ॥ (486) कृतलक्षणः—कृतं हि लाञ्छनं येन स्वोपादेयेषु जन्तुषु। परमात्मा हृषीकेशः स तु स्यात् कृतलक्षणः ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः।
आदिदेवो महादेवो देवेशो देवभृत् गुरुः ॥ ५२ ॥

(487) गभस्तिनेमिः—ज्योतिर्विशिष्टं नेम्योपलक्षितं यस्य तूत्तमम्। चक्रं गभस्तिनेमिः स नवार्णः पापनाशकः ॥ (488) सत्त्वस्थः—सत्त्वे हृदि स्थितत्वात् स सत्त्वस्थः समुदीरितः। (489) सिंहः—हरिभक्तानविज्ञाय दण्डे प्रवणमानसान्। हिनस्ति च यमादीन् यः स सिंहः परिकीर्तितः ॥ (490) भूतमहेश्वरः—भूतेश्वराणां स ब्रह्मयमादीनां नियन्त्रणात्। कारणं जगतां यश्च स स्यात् भूतमहेश्वरः ॥ (491) आदिदेवः—आदिदेवो हि भवति ब्रह्मादिभ्यो विशेषतः ॥ (492) महादेवः—ब्रह्मादिभिः क्रीडति यो महादेवः स उच्यते ॥ (493) देवेशः—ब्रह्मादीनां च देवेशो यथार्हविनियोजकः ॥ (494) देवभृत्—ब्रह्मशक्रयमादीनां भरणात् देवभृत् स्मृतः ॥ (495) गुरुः—ब्रह्मेन्द्रवरुणादीनां गुरुर्वेदोपदेशनात् ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३ ॥

(496) उत्तरः—आपदुत्तारणात् योऽसौ ब्रह्मादेरुत्तरः स्मृतः ॥ (497) गोपतिः—छन्दोभाषावेदवाचां निर्वाहात् गोपतिः स्मृतः ॥ (498)

गोप्ता—पालनात् सर्वक्रियानां गोप्तेति परिकीर्तितः ॥ (499) ज्ञानगम्यः—परया विद्यया वेद्यो ज्ञानगम्य इति स्मृतः ॥ (500) पुरातनः—विद्याप्रद्योतनात् योऽसौ प्रतिकल्पं पुरातनः ॥ (501) शरीरभूतभृत्—देहभूतं जगत्तत्वं प्रकृत्यादिधरान्तकम्। शरीरभूतभृत् प्रोक्तो बिभर्तीति दशाक्षरः ॥ (502) भोक्ता—हव्यं कव्यं च यो भुङ्क्ते स भोक्ता परिकीर्तितः ॥ (503) कपीन्द्रः—कपिरूपं प्रपन्नानां देवानामीश्वरत्वतः । कपीन्द्र इति विख्यातः सप्तार्णो मनुनायकः ॥ (504) भूरिदक्षिणः—हयमेधादिभिर्यज्ञैः जगदाचार्यकाय वै। यजमानः स विज्ञेयः सर्वदा भूरिदक्षिणः ॥

सोमपोऽमृतपस्सोमः पुरुजित् पुरुसत्तमः ।
विनयो जयस्सत्यसन्धो दाशार्हस्सात्वतांपतिः ॥ ५४ ॥

(505) सोमपः—हयमेधे सोमपीथी सोमपः परिकीर्तितः । (506) अमृतपः—परिणामोऽस्य हविषां पीयूषमिति कथ्यते। तत्पानात् स्यादमृतपः परमे व्योम्नि वा स्थितः । मुक्तेभ्यो यः स्वानुभवं पातीत्यमृतपः स्मृतः ॥ (507) सोमः—सोमः सुधायमानत्वात् मुक्तानां परिकीर्तितः ॥ (508) पुरुजित्—लोकान् दीनान् गुरून् शत्रून् बहून् सत्येन दानतः। शुश्रूषया च धनुषा जितवान् पुरुजित् स्मृतः ॥ (509) पुरुसत्तमः—पुरुर्महान् महत्स्वस्तितमो हनुमदादिषु । पुरुसत्तम आख्यातो नवार्णः स्वस्तिदो मनुः ॥ (510) विनयः—कुम्भकर्णमहाकायखरमारीचरावणाः। दम्यन्ते विक्रमैर्येन विनयः स उदाहृतः। (511) जयः—आश्रितैर्जीयते यस्मात् विधेयीक्रियते जयः ॥ (512) सत्यसन्धः—सत्या प्रतिज्ञा यस्येति सत्यसन्धः स उच्यते । (513) दाशार्हः—आत्मनो वाऽर्पणं भक्तैस्तेभ्यो वा स्वात्मनोऽर्पणम्। दाशस्तमर्हतीत्येष दाशार्हः परिकीर्तितः ॥ (514) सात्वतां पतिः—येषां सत् ते हि सत्वन्तः तेषां यत् सात्वतं तु तत्। तत् करोति तदाचष्टे सात्वत् भागवतः स्मृतः। यद्वा सातयति ह्येवं सुखयत्याश्रितानिति। सातपदेनोच्यते ब्रह्म सात्वन्तो भगवत्पराः। सात्वतां भगवद्भक्तजनानां पतिरीश्वरः। सात्वतांपतिरित्युक्तो नवार्णस्साधुरक्षकः ।

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५ ॥

(515) जीवः—तानात्मनाशाद्व्यावर्त्य सत्त्वान यश्च स्वसेवया । उज्जीवयति जीवः स भक्तक्लेशासहो मनुः ॥ (516) विनयिता—भक्तान् नित्यं राजपुत्रलालनन्यायतः सुखम् । रक्षत्यतो विनयिता नयतेः रक्षणार्थतः ॥ (517) साक्षी—साक्षात्करोति यः साक्षी तद्वृत्तं रक्षणाय सः ॥ (518) मुकुन्दः—तैः प्रार्थितः स्वयं मुक्तिं मुकुन्दः स्यात् ददाति यः । (519) अमितविक्रमः—तेषां ध्यानानुसन्धेयतत्त्वसन्दोह-धारिणीम् । तां शक्तिं धृतवान् योऽसौ स्मृतो ह्यमितविक्रमः । (520) अम्भोनिधिः—आधारशक्तिकमठः स्वरूपेणार्णवाम्बसि । निधीयते स्वयं येन स ह्यम्भोनिधिरुच्यते ॥ (521) अनन्तात्मा—कमठस्योपरि जगदा-धारस्तम्भभोगिनः । स्वरूपेण स्थितो योऽसावनन्तात्मा प्रकीर्तितः ॥ (522) महोदधिशयः—तस्मिन् अनन्तपर्यङ्के समुद्रे शयनाच्च यः । महो-दधिशयः ख्यातो दशार्णो मनुरुत्तमः ॥ (523) अन्तं करोति जगतो योऽसावन्तक ईरितः ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६ ॥

(524) अजः—तत्त्वावसाने प्रणवप्रकृतेः स त्वकारतः । स्मर्तव्य-वादजः प्रोक्तः षडर्णो ह्यर्मिनाशकः ॥ (525) महार्हः—स्वरूपादि-कृतार्थेन तारेणात्मनिवेदनम् । महं पूजामर्हतीति महार्ह इति कथ्यते ॥ (526) स्वाभाव्यः—मन्त्रेणानेनात्मभिस्तु स्वभूतैराभिमुख्यतः । अवश्यं भावनीयत्वात् स्वाभाव्यः परिकीर्तितः ॥ (527) जितामित्रः—एतद्रहस्य-विज्ञानविरोधिममतादयः । जितास्तेषामनेनेति जितामित्रोऽष्टवर्णकः ॥ (528) प्रमोदनः—ध्यानासक्तेषु भक्तेषु मोदमानः प्रमोदनः ॥ (529) आनन्दः—अनन्दवल्लीमीमांस्यस्त्ववाङ्मनसगोचरः । आनन्दो ह्यस्य नित्योऽस्तीत्यानन्दः परिकीर्तितः ॥ (530) नन्दनः—तमानन्दं यथोक्तायां मुक्तौ प्रापय्य यस्सदा । मुक्तान् नित्यान् नन्दयति नन्दनः स तु कीर्तितः॥ (531) नन्दः—भोग्यैर्भोगोपकरणैर्भोगैर्भोक्तृभिरेव च । तस्मिन् समृद्ध्यते नित्यमिति नन्दः प्रकीर्तितः ॥ (532) सत्यधर्मा—आ प्रक्रमादा स्वप्राप्ते-

राजवात् सत्यवर्तनः । यः स्यात् स सत्यधर्मा च वस्वर्णः सत्यधर्मदः ॥ (533) त्रिविक्रमः—त्रीन् वेदान् क्रमते यो हि महिम्ना स त्रिविक्रमः ।

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७ ॥

(534) महर्षिः—साक्षात् द्रष्टा स वेदानां महर्षिः कपिल स्मृतः ॥ (535) कपिलाचार्यः—तत्त्वप्रवचनादेष कपिलाचार्य उच्यते । (536) कृतज्ञः—स्वाम्निमप्रत्वसुकृतं किञ्चिदंशुमता कृतम् । विदितं येन कारुण्यात् कृतज्ञः सोऽभिधीयते ॥ (537) मेदिनीपतिः—कापिलं रूपमास्थाय यो धारयति मेदिनीम् । स मेदिनीपतिः ख्यातो नवार्णो भूप्रदो मनुः ॥ (538) त्रिपदः—भोक्तृभोग्यनियन्तॄणि ज्ञाप्यान्यस्य पदान्यतः । प्रणवे त्रीणि वाऽप्येतद्वाचकानि पदान्यतः ॥ वाराहरूपस्याऽऽस्थाने पदानि ककुदानि वा । त्रीणि सन्ति ततो वाऽसौ त्रिपदः परिकीर्तितः ॥ (539) त्रिदशाध्यक्षः—सखा स्यात् त्रिदशाध्यक्षो ब्रह्मादेः प्रलयापदि ॥ (540) महाशृङ्गः—मही यस्य च शृङ्गाग्रे महाशृङ्गः स कथ्यते ॥ (541) कृतान्तकृत्—अन्तकाभं हिरण्याक्षं कृत्तवान् यः कृतान्तकृत् । वाराहयोः स्वसिद्धान्तकृतेः स्मृतिपुराणयोः । कृतान्तकृदिति ख्यातो वस्वर्णोऽभीष्टदायकः ॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥

(542) महावराहः—रसातलगतामुर्वीं यश्चोद्धृत्योत्स्थितः क्षणात् । महावराह इति स स्मृतो ह्युर्वीप्रदो मनुः ॥ (543) गोविन्दः—नष्टां च धरणीं पूर्वं गोविन्दो लब्धवानिति ॥ (544) पञ्चोपनिषदङ्गत्वात् सुषेणः परिकीर्तितः ॥ (545) कनकाङ्गदी—अप्राकृतानि दिव्यानि भूषणानि च नित्यशः । रौक्माणि सन्ति यस्यासा वुच्यते कनकाङ्गदी ॥ (546) गुह्यः—पञ्चोपनिषदङ्गेन गूढत्वात् गुह्य उच्यते ॥ (547) गभीरः तद्वपुर्व्यङ्ग्यगाम्भीर्यो गभीर इति कथ्यते ॥ (548) गहनः—अन्यैर्दुरवगाहत्वात् गहनः परिकीर्तितः ॥ (549) गुप्तः—तद्गौरवशैर्गुप्तः स गुप्त इत्यभिधीयते ॥ (550) चक्रगदाधरः—यः शक्तिमद्दिव्यहेतिः स स्याच्चक्रगदाधरः

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९ ॥

(551) वेधाः—महाविभवकल्याणे सन्ततं विदधाति यः । भक्तेभ्यः परमं वेधाः षडर्णो मङ्गलप्रदः ॥ (552) स्वाङ्गः—स्वासाधारणमङ्गं हि छत्रादि परिबर्हणम् । यस्यास्ति नित्यं स स्वाङ्गः षडर्णः परिवारदः ॥ (553) अजितः—प्राकृतैर्न जिता यस्यास्याजिताख्या पुरीति वा । अजितः स तु विज्ञेयः सप्तार्णो मुक्तिदो मनुः ॥ (554) कृष्णः—अप्राकृतातिरुचिरमेचकः कृष्ण ईरितः ॥ (555) दृढः—स्थूलत्वात् बलवत्त्वाच्च दृढ इत्यभिधीयते ॥ (556) सङ्कर्षणः—सङ्कर्षणः संसृतौ यः समं चिदचितौ कृषेत् । (557) अच्युतः—ब्रह्मादिवन्न च्यवते स्थानात् इत्यच्युतः स्मृतः ॥ (558) वरुणः—यः स्थितः सर्वमावृत्य वरुणः स तु कथ्यते । (559) वारुणः — स्वामित्वेन वृणानेषु स्थितो वारुण ईरितः ॥ (560) वृक्षः—साधूनामाश्रयत्वाच्च सर्वैनस्सहनादपि । सर्वोपजीव्यसर्वस्वो इत्यभिधीयते ॥ (561) पुष्कराक्षः—सतां प्रसादवर्षेण पोषके चाक्षिणी । पुष्कराक्षस्स विज्ञेयो ह्यष्टार्णः प्रीतिवर्धकः ॥ (562) महामनाः—अगाधोदारविस्तारं मनो यस्य महामनाः ॥

भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यस्सहिष्णुर्गतिसत्तमः ॥ ६० ॥

(563) भगवान्—सर्वहेयप्रत्यनीककल्याणात्मतया स्थितः। पूज्यात् तमो योऽसौ भगवानिति शब्द्यते ॥ (564) भगहा—भगशब्द्यान् स कल्याणगुणान् हन्ति तु गच्छति । इत्यसौ भगहा प्रोक्तः षडर्णः सुखदः ॥ (565) नन्दी—नन्दगोपेन पितृमान् नन्द्यानन्दीति वा तथा । (566) वनमाली—स्वसृज्यभूतसूक्ष्माणां मालया नित्ययोगतः । वनमाली समाख्यातो ह्यष्टार्णो भूषणप्रदः ॥ (567) हलायुधः—हलं च तं सीरं धत्ते योऽसौ हलायुधः । सीरकार्यसमृद्ध्यर्थं वस्वर्णो मन्त्र ॥ (568) आदित्यः—आवर्णादेव यः प्राप्यः स आदित्यः : । अदितिर्देवकी तस्याः वाऽऽदित्योऽपत्यभावतः ॥ (569) ज्योतिरादित्यः—समस्ततेजोहरणज्योतिषा दीप्यते च यः । स वै स्वयं

ज्योतिरादित्यो नवार्णो ज्ञानदायकः ॥ (570) सहिष्णुः—ब्रह्मादिमन्तु-सहनात् सहिष्णुरिति कथ्यते । (571) गतिसत्तमः—धर्मे प्रत्ययिततमो गतिसत्तम उच्यते ॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥

(572) सुधन्वा—सु शोभनं धनुर्यस्य सुधन्वा परिकीर्तितः । (573) खण्डपरशुः—तीव्रक्षेपात् परशुना रौद्रसंग्रामखण्डनात् । प्रोक्तः स खण्डपरशुः नवार्णः शोकनाशकः ॥ (574) दारुणः—बाह्याभ्यन्तरशत्रूणां दारणादपि दारुणः ॥ (575) द्रविणप्रदः—शास्त्रं तदर्थं द्रविणं प्रददाति जनाय यः । व्यासो भूत्वा हरिः साक्षात् द्रविणप्रद उच्यते ॥ (576) दिविस्पृक्—परया विद्यया यः स्वं स्पृशतीति परे पदे । दिविस्पृक् प्रोच्यते नित्यम् ॥ (577) सर्वदृक्—सर्वदृक सर्वदर्शनात् । (578) व्यासः—त्रय्याश्चतुर्धा करणात् व्यास इत्युच्यते बुधैः । (579) वाचस्पतिः—वाचः पञ्चमवेदस्य स्वामी वाचस्पतिः स्मृतः ॥ (580) अयोनिजः—सारस्वतावतारे हि भगवद्वाग्भवत्वतः । स्मृतो ह्ययोनिज इति वस्वर्णः कर्मनाशकः ॥

त्रिसामा सामगस्साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमश्शान्तो निष्ठा शान्तिः परायणम् ॥ ६२ ॥

(581) त्रिसामा—प्रोक्तस्त्रिसामा यस्मात्स बृहदादित्रिसामकः । (582) सामगः—स्वयं स्वानुभवप्रीत्या गायतीति च सामगः ॥ (583) साम—स्वगायकानां कालुष्यं स्यति यः साम कथ्यते॥ (584) निर्वाणम्—निर्वाणं स्यात् परगतेर्निमित्तं निर्गतैनसाम् ॥ (585) भेषजम्—असाध्यभवरोगस्य भेषजं यत् सदौषधम् ॥ (586) भिषक्—भवरोगनिदानज्ञो योऽसौ भिषगुदीरितः ॥ (587) सन्न्यासकृत्—त्यागेन सात्त्विकेनाशु रजसस्तमसः पदम् । यः कृन्तति स सन्न्यासकृत् नवार्णो मनुः स्मृतः ॥ (588) शमः—अनुद्रिक्तः शमः प्रोक्तः (589) शान्तः—शान्तोऽविकृतमानसः ॥ (590) निष्ठा—निष्ठीयते च योगोत्थैर्यत्र निष्ठा स कथ्यते ॥ (591) शान्तिः—सर्वाधिकाराः शाम्यन्ति समाधौ परमे यतः । अतः

शान्तिरिति प्रोक्तः ऋत्वर्णो भक्तिदो मनुः ॥ (592) परायणम्—यस्मात् तु परमा भक्तिः चरमा प्रापिका मता । तस्मात् परायणमिति स्मृतो ह्यष्टार्ण उत्तमः ॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥

(593) शुभाङ्गः—स्वभक्त्युद्भवकल्याणयमाद्यष्टाङ्गसंभवः । यः स्यात् शुभाङ्गः स प्रोक्तः सप्तार्णो ध्यानदायकः ॥ (594) शान्तिदः—एवं निष्पन्नभक्तिभ्यः शान्तिं सायुज्यसंज्ञिकाम् । महानन्दां ददातीति शान्तिदः परिकीर्तितः ॥ (595) स्रष्टा—कर्मवैचित्र्यतः सृज्यान् स्रष्टा स्यात् सृजतीति यः । (596) कुमुदः—कौ प्राकृते मण्डलेऽस्मिन् स्वभोक्तॄनपि भोजयन् । मोदते यः सर्वकालं कुमुदस्स तु गीयते । (597) कुवलेशयः—वलं येषां कुत्सितं ते कुवलाः जीवसंज्ञिताः । देहेन्द्रियादेरीशास्ते कुवलेशा इति स्मृताः । यस्तान् नियच्छन् यात्येष कुवलेशय उच्यते ॥ (598) गोहितः—संसारबीजक्षेत्रस्य प्रकृतेः स्थापकश्च यः । स गोहितः (599) गोपतिः—स स्वर्भूमेः पतित्वात् गोपतिः स्मृतः ॥ (600) गोप्ता—गोप्ता स यः कर्मफलचक्रस्य परिपालकः ॥ (601) वृषभाक्षः—यतोऽक्षो वृषभो धर्मो वृषभाक्षस्स उच्यते ॥ (602) वृषप्रियः—धर्मौ प्रियौ तावस्येति प्रवर्तकनिवर्तकौ । वृषप्रियस्स विज्ञेयो ह्यष्टार्णः फलदो मनुः ॥

ः निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
क्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥ ६४ ॥

(603) अनिवर्ती—पितृयाणप्रवृत्तानां संसारादनिवर्तनात् । अनिवर्ती समाख्यातो ह्यष्टार्णोऽभयदो मनुः ॥ (604) निवृत्तात्मा—सर्वे निवृत्तिधर्माणो यस्यात्मानः स तु स्मृतः । निवृत्तात्मेत्यष्टवर्णो दुष्कर्मफलमोचकः ॥ (605) संक्षेप्ता—स्वाभाविकासंकुचितमेधाया अप्रसारणम् । प्रवृत्तिधर्मणां कर्तुं शीलं यस्यास्ति सर्वदा । स संक्षेप्तेति कथितः षडर्णो धीविकासदः ॥ (606) क्षेमकृत्—असंकोचज्ञानरूपक्षेमस्य करणात् सताम् । क्षेमकृच्चापि सर्वेषां (607) शिवः—शिवस्य करणाच्छिवः ॥ (608) श्रीवत्सवक्षाः—लक्ष्मीवाल्लभ्यसौभाग्यचिह्नं

श्रीवत्सनामकम् । श्रीवत्सवक्षा अस्यास्ति वक्षसीति स तु स्मृतः ॥ (609) श्रीवासः—श्रियो विहारस्थानत्वात् श्रीवास इति चोच्यते ॥ (610) श्रीपतिः—स्वयं श्रिया पतित्वेन वृतत्वात् श्रीपतिः स्मृतः ॥ (611) श्रीमतांवरः—देवानां श्रीमतां श्रेष्ठः श्रीमतां वर उच्यते ॥

श्रीदश्श्रीशश्श्रीनिवासः श्रीनिधिश्श्रीविभावनः ।
श्रीधरश्श्रीकरश्श्रेयश्श्रीमाँल्लोकत्रयाश्रयः ॥ ६५ ॥

(612) श्रीदः—योऽसौ श्रियै स्वप्रणयरसदः श्रीद ईरितः ॥ (613) श्रीशः—श्रीशः स श्रिय ईशत्वात् ईशा श्रीरस्य सेति वा ॥ (614) श्रीनिवासः—नित्योपघ्ननिवासत्वात् श्रीनिवासः श्रियः स्मृतः ॥ (615) श्रीनिधिः—श्रीरस्मिन् निहिता नित्यं श्रीनिधिः परिकीर्तितः ॥ (616) श्रीविभावनः— श्रीः प्रख्योपाख्ययोर्हेतुर्यस्य स श्रीविभावनः ॥ (617) श्रीधरः—रुच्यर्चिःकौमुदीगन्धान् निसर्गाद्धरति श्रियम् । सुधारत्नेन्दुपुष्पाणि यथाऽसौ श्रीधरस्ततः ॥ (618) श्रीकरः—व्यूहादिष्ववतारेषु स्वानुरूपां करोति ताम् । श्रियं योऽसौ श्रीकरः स्यात् मुन्यर्णः श्रीकरो मनुः । (619) श्रेयश्श्रीमान्—श्रेयसे श्रयणीया श्रीः श्रेयश्श्रीर्नित्ययोगिनी । श्रेयःश्रीमानसावस्य वस्वर्णः पुरुषार्थदः ॥ (620) लोकत्रयाश्रयः—श्रिया सह जगन्मात्रा पितृवत् सकलाश्रयः । लोकत्रयाश्रयः स स्यात् दशार्णो रक्षकत्वदः ॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥

(621) स्वक्षः—श्रीसौन्दर्यसुधासिन्धु पारीणकरणो हि यः । स्वक्षः (622) स्वङ्गः—श्रीस्पृहणीयाङ्गः स्वङ्ग इत्येष उच्यते ॥ (623) शतानन्दः—अन्योन्यप्रणयानन्दप्रवाहश्चामितोऽस्य हि । शतानन्दः स विज्ञेयो दम्पत्यानन्ददो मनुः ॥ (624) नन्दिः— सर्वत्र सर्वथा नन्दिः श्रिया ऋध्यति सर्वदा ॥ (625) ज्योतिर्गणेश्वरः—नित्यसूरिगणानां य ईशो ज्योतिर्गणेश्वरः ॥ (626) विजितात्मा—सौशील्यस्य गुणस्याथ परमावधिवर्णनम् । विजितात्मा जितं यस्य मानसं प्रणतैश्च सः ॥ (627) विधेयात्मा—इहागच्छेह तिष्ठेदं भुङ्क्ष्वेति प्रणतैस्सदा । योग्यं विधातुं

यद्रूपं विधेयात्मा स कीर्तितः ॥ (628) सत्कीर्तिः—ईदृक्सौशील्यसत्त्वाद्धि सत्कीर्तिरिति कथ्यते ॥ (629) छिन्नसंशयः—सौशील्यप्रथया चैवं दुष्करत्वादिसंशयः। छिन्नो येन विशेषेण स प्रोक्तश्छिन्नसंशयः ॥

उदीर्णः सर्वतश्चक्षुरनीशश्शाश्वतस्थिरः।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥

(630) उदीर्णः—प्रत्यक्षविषयत्वेन ह्युत्पन्नश्चर्मचक्षुषाम्। उदीर्ण इति स प्रोक्तः सप्तार्णो नयनप्रदः ॥ (631) सर्वतश्चक्षुः—यत्साक्षात्कारकर्माणि चर्मचक्षूंष्यपि त्वतः। सर्वतः सर्वतश्चक्षुर्नवार्णो नेत्रशक्तिदः ॥ (632) अनीशः—प्रोक्तो ह्यनीशो भक्तेषु तदायत्ताखिलक्रियः ॥ (633) शाश्वतस्थिरः—बिम्बाकृत्याऽऽत्मना बिम्बे स्थितः स्यात् शाश्वतस्थिरः ॥ (634) भूशयः—स्वयंव्यक्तादिरूपेण कौ शेते भूशयस्ततः ॥ (635) भूषणः—एवं विश्वजनीनेन शीलेनैष श्रियः पतिः। यदात्मानं भूषयति भूषणस्तत् स कीर्तितः ॥ (636) भूतिः—योऽसौ समृद्धिमैश्वर्यं भक्तानां भूतिरीरितः ॥ (637) अशोकः—नाथत्वाच्चापि सर्वेषां अशोकोऽनाथताहृतेः ॥ (638) शोकनाशनः—भक्तानां स्वेन संबन्धव्यतिरेकनिबन्धनम्। शोकं नाशयतीत्येष शोकनाशन ईरितः ॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८ ॥

(639) अर्चिष्मान्—बाह्याभ्यन्तरसद्भक्तचक्षुरुन्नयनक्षमम्। दिव्यं तेजः सदा यस्य सोऽर्चिष्मानिति कथ्यते ॥ (640) अर्चितः—अर्चा ह्यर्चावतारोऽस्य क्षेत्रायतनसद्मसु। सञ्जातेत्यर्चितः प्रोक्तः सप्तार्णो वाञ्छितप्रदः ॥ (641) कुम्भः—काम्यते स सजातीयैर्गुणैः कुम्भः प्रकीर्तितः। कौ स भातीति कुम्भो वा षडर्णो भयनाशकः ॥ (642) विशुद्धात्मा—सर्वाश्रितेष्वशेषेण सर्वस्य त्यागतः सदा। विशुद्धात्मा, (643) विशोधनः—क्षेत्रमृतशोधकः स्यात् विशोधनः ॥ (644) तत्तत्क्षेत्रेश्वरोक्तिः स्यादनिरुद्धादिनामभिः। अनिरुद्धः—वासुभाण्डाख्यभूभागे नित्यसंनिहितः स्थितः। अनिरुद्ध इति ख्यातो वस्वर्णो मनुरुत्तमः ॥ (645) अप्रतिरथः—प्रतिपक्षस्य राहित्यात् बद्धनिष्ठजनार्दनः। विख्यातो ह्यप्रतिरथो नवार्णः शत्रुनाशकः ॥ (646)

प्रद्युम्नः—आत्मप्रद्योतनत्वाच्च प्रद्युम्न इति कथ्यते। "अधिष्ठाय स्थितः साक्षात् भक्तानां सुगतिप्रदः" ॥ (647) अमितविक्रमः—लोकत्रयेऽप्य-पर्याप्तविक्रमोऽमितविक्रमः ॥

कालनेमिनिहा वीरश्शौरिश्शूरजनेश्वरः।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९ ॥

(648) कालनेमिनिहा—कालचक्रस्य या नेमिरविद्याख्या च दुर्धरा। तां नाशयति यश्चासौ कालेनेमिनिहा स्मृतः। नवाक्षरो मनुरयमविद्या-मूलमोचकः। (649) शौरिः—शौरिनाम्ना स्थितः शौरिरुत्पलावर्तके शुभे ॥ (650) शूरः—सर्वरक्षःक्षयकरः शूर इत्यभिधीयते ॥ (651) शूरजनेश्वरः—पराक्रमिजनेशत्वात् स्मृतः शूरजनेश्वरः ॥ (652) त्रिलोकात्मा—यः सातत्येन लोकांस्त्रीन् भक्तानुग्रहकाम्यया। गच्छ-त्यसौ त्रिलोकात्मा वस्वर्णो भूतिदायकः॥ (653) त्रिलोकेशः त्रिलोकाना-मीशतया त्रिलोकेशः प्रकीर्तितः ॥ (654) केशवः—ब्रह्मेशयोः स्वाङ्गज-त्वात् केशवः परिकीर्तितः॥ (655) असुरं केशिनामानं हतवान् केशिहा स्मृतः ॥ (656) हरिः—गोवर्धनस्थो हरितः क्रतुभागहरो हरिः ॥

कामदेवः कामपालः कामी कान्तः कृतागमः।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जय. ॥ ७० ॥

(657) कामदेवः—शंकरालयगः कामदेवः सर्वेष्टदः स्मृतः। (658) कामपालः—दत्तानुपालकश्चैव कामपालः प्रकीर्तितः ॥ (659) कामी—प्रदेयातिशयात् कामी। (660) कान्तः—कान्तश्च कमनीयकः ॥ तत्तत्क्षेत्रेशोक्तिरेवमुपर्यपि यथोचितम्। (661) कृतागमः—अथ शाक्त्य-वतारोऽत्र मन्त्रात्मा स्यात् कृतागमः ॥ (662) अनिर्देश्यवपुः—युगानु-सारिरूपत्वात् अनिर्देश्यवपुः स्मृतः ॥ (663) विष्णुः—स्वशक्त्या सर्व-जगतो व्याप्ते विष्णुरिति स्मृतः (664) वीरः—वीरः स्यात् साधुसंताप-कारिणोऽजति हन्ति यत्। (665) अनन्तः—देशतः कालतो वापि गुणतो वस्तुतोऽपि वा। अवधिस्तस्य नास्तीति सोऽनन्तः समुदाहृतः। (666) धनञ्जयः—प्रेप्सोपार्जनलोभादियोग्यत्वाधिक्यसत्त्वतः। मणिमौक्तिकर-त्नादिहेमरूप्यादिकं धनम्। जयत्यधः करोतीति धनञ्जय इतीरितः ॥

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥

(667) ब्रह्मण्यः—जीवात्मा प्रकृतिश्चापि ब्रह्मेति व्यपदिश्यते । कारणं स्थितिभोगादेः सर्वावस्थासु यत् ततः । ताभ्यां हितः सन् ब्रह्मण्यः सप्तार्णो भोगदायकः ॥ (668) ब्रह्मकृद्ब्रह्मा—महदादितमःकार्यं ब्रह्मेति ह्यभिधीयते । तस्य कर्ता स्वयं ब्रह्मा नियाम्यो यस्य सर्वदा । स तु स्यात् ब्रह्मकृद्ब्रह्मा नवार्णः सर्वशक्तिदः ॥ (669) ब्रह्म—व्यक्ताव्यक्त-समष्ट्यादि पुरुषांश्चैव नित्यशः । गुणैश्च कल्याणतमैर्ब्रह्म बृंहयतीति च । रूपैः स्वरूपेण गुणैर्विभवैश्च स्वयं सदा । बृंहतीति च तद् ब्रह्म षडर्णः सन्ततिप्रदः ॥ (670) ब्रह्मविवर्धनः—तपोविवर्धनान्नित्यं स्मृतो ब्रह्मविवर्धनः ॥ (671) ब्रह्मवित्—यो वेदान्अन्ततो वेत्ति स ब्रह्मविदुदीरितः ॥ (672) ब्राह्मणः—दत्तात्रेयादिरूपेण ह्युदीर्णो ब्राह्मणःस्मृतः । पठनाद्वाऽथ वेदस्य ब्राह्मणः परिकीर्तितः ॥ (673) ब्रह्मी—मानमेयस्वरूपैतत्स्वामी ब्रह्मीति शब्द्यते ॥ 674 ब्रह्मज्ञः—यो वेदान्अर्थतो वेत्ति सोऽयं ब्रह्मज्ञ ईरितः ॥ (675) ब्राह्मणप्रियः—वेदाधिकारिणो विप्राः प्रिया यस्येति वै सदा । ब्राह्मणप्रिय इत्युक्तो नवार्णो धर्मदो मनुः ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥

(676) महाक्रमः—परमोन्नतिमात्मानं निम्नात् भवरसातलात् । जीवान् समारोहयतो ज्ञानभक्त्यादिरूपिणी । पर्वानुपूर्वी यस्यास्ति स महाक्रम ईरितः ॥ (677) महाकर्मा—अत्यन्तहीनान् जन्तूंश्च योग्यान् स्वानुभवस्य हि । करोति महदाश्चर्यं कर्म तत् यस्य सर्वदा । महाकर्मा स विज्ञेयो ह्यष्टार्णो मनुरुत्तमः ॥ (678) महातेजाः—अनाद्यविद्याख्यतमोहारि तेजो महत् यतः । महातेजा ह्यतः ख्यातः तेजोदो वसुवर्णकः (679) महोरगः—महोरग इति ख्यातश्चित्तद्वारा प्रवेशनात् ॥ (680) महाक्रतुः—सर्वैश्च सुकरा पूजा यस्य स्यात् स महाक्रतुः ॥ (681) महायज्वा—देवतान्तरयाजिभ्यः स्वयाज्युत्कर्षकारकः । महायज्वा समुद्दिष्टः सत्कर्मफलदो मनुः ॥ (682) महायज्ञः—अन्येभ्यो देवयागेभ्यः स्वयागोत्कर्षकारकः । महायज्ञः समाख्यातो ह्यष्टार्णो हरियागदः ॥ (683) महाहविः—अहिंस्रमात्मादि हविर्यस्य स्यात् स महाहविः ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥

(684) स्तव्यः—चेतश्शरीरयोर्जन्तोर्व्यापाराराध्यता हरेः । उक्ता नारायणस्याथ वागाराध्यत्वमुच्यते । स्मृतः स्तुत्यर्हणात् स्तव्यः षडर्णो बन्धमोचकः ॥ (685) तवप्रियः—यया कयाचिद्धारत्या येन केनापि जन्तुना । यथाकथञ्चित् कथितो यस्य प्रियतमः स्तवः । स्त वप्रियः स कथितो वस्वर्णः प्रीतिवर्धकः । (686) स्तोत्रम्—स्वेनैव निष्पाद्यतया स्वस्तुतेः स्तोत्रमुच्यते ॥ (687) स्तुतः—शेषशेषाशनाद्यैर्यः सूरिभिश्चास्मदादिभिः । स्तुतत्वादविशेषेण स्तुतं इत्यभिधीयते ॥ (688) स्तोता—स्वस्तोतारं परं स्तोतुं शीलं यस्यास्ति सर्वदा । स्तोता स स्यात् पञ्चवर्णः सर्वस्तुत्यत्वदो मनुः ॥ (689) रणप्रियः—सुहृत्प्रियं युद्धकर्म यस्यास्ति स रणप्रियः ॥ (690) पूर्णः—अवाप्तसर्वकामत्वं यस्यासौ पूर्ण उण्यते ॥ (691) पूरयिता—सदा पूरयितुं शीलं यस्य स्तोतृमनोरथान् । स स्यात् पूरयिता (692) पुण्यः—नुण्यः सोऽपि पातकिपावनः ॥ (693) पुण्यकीर्तिः—पुण्यः श्लोकोऽस्ति यस्तास्य पुण्यकीर्तिः स तु स्मृतः । (694) अनामयः—संसाराख्यमहाव्याधेः विरोधित्वादनामयः

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४ ॥

(695) मनजतवः—भक्तानां संपदः शीघ्रं करोतीति मनोजवः ॥ (696) तीर्थकरः—गङ्गादितीर्थहेतुत्वात् श्रुतिस्मृत्योः प्रवर्तनात् । आत्मप्रवेशसोपानकृत्त्वात् तीर्थकरः स्मृतः । (697) वसुरेताः—वसुशब्दोज्योतिरर्थोरेतस्तत्कारणं मतम् । दिव्यज्योतिःकारणत्वात् वसुरेताः प्रकीर्तितः ॥ (698) वसुप्रदः—देवकीवसुदेवाभ्यां आत्मरूपं महद्धनम् । पुत्रत्वेन प्रकर्षेण ददातीति वसुप्रदः ॥ (699) वसुप्रदः—देवकीवसुदेवाभ्यां स्वपितृत्वं महद्वसु । तेजोऽसौ प्रददातीति वसुप्रद इतीरितः ॥ (700) वासुदेवः—घसुदेवापत्यभावत् । वासुदेवः प्रकीर्तितः ॥ (701) वसुः—वसतीति वसुर्लोकहितेच्छुः क्षीरसागरे ॥ (702) वसुमनाः—सिन्धौ लक्ष्मीजन्मभूमौ वसतोऽप्यस्य वै मनः । वसुदेवे सदाऽस्तीति स स्यात् वसुमनाः परम् ॥ (703) हविः—नन्दगोपयशोदाभ्यां कंसोपद्रवशान्तये । अदीयताऽऽदीयत च ताभ्यां हविरतः स्मृतः ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणम् (णः) ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५ ॥

(704) सद्गतिः—उत्पन्न एव कंसादिकृतबाधापनोदनात् । सतां प्राप्यतया चैव सद्गतिः समुदाहृतः॥ (705) सत्कृतिः—रासक्रीडादिकृतयः सत्या यस्य स सत्कृतिः ॥ (706) सत्ता—स्वयमेव सतां सत्ता यत् तत् सत्तेति कीर्त्यते ॥ (707) सद्भूतिः—सतां पुत्रकलत्रादिभूत्या सद्भूतिरुच्यते ॥ (708) सत्परायणम् (णः)—सतां परं स्यादयनं सत्परायण मीश्वरः । यद्वाऽयनं परं सन्तो यस्यासौ सत्परायणः॥ (709)—शूरसेनः—भूभारहरणार्थाय यादवाः पाण्डवाश्च ये । शूराः सहायास्ते ऽस्येति शूरसेनः स कथ्यते ॥ (710) यदुश्रेष्ठः—मग्नं तु यादवं वंश-मुद्धरिष्यति यश्च सः । यदुश्रेष्ठ इति ख्यातः वस्वर्णो वंशवर्धनः ॥ (711) सन्निवासः—सनकादिनिवासो हि मनुष्यत्वेऽपि यः सदा । सन्निवासः स विज्ञेयो ह्यष्टार्णः स्थानदायकः ॥ (712) सुयामुनः—गोपीभिर्य-मुनायां तु शोभनं पावनं महत् । जलक्रीडादि यस्येति सुयामुन इतीरितः ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो (ऽ) दृप्तो दुर्धरोऽथापराजितः ॥ ७६ ॥

(713) भूतावासः—यस्मिन् वसन्ति भूतानि भूतावासः स कथ्यते । (714) वासुदेवः—वसुदेवापत्यतया ह्यादशाध्यात्ममञ्जसा । नियच्छति सदा यस्तु वासुदेवः स ईरितः ॥ (715) सर्वासुनिलयः—सर्वासुनिलयः स स्यात् सर्वप्राणावलम्बनम् ॥ (716) अनलः—सर्वं कृत्वापि गोपानां न च किञ्चिन्मया कृतम् । इत्येवमवितृप्तो यः सोऽनलः परिकीर्तितः ॥ स्वभक्तेभ्यः कृतं मन्तुं नालं सोढुं स वाऽनलः ॥ (717) दर्पहा—गोवर्धनस्योद्धरणे पारिजातपरिग्रहे । बाणदोर्दण्डषण्डानां खण्ड-नादौ तदा तदा । देवानां वै दर्पमालं हतवान् यः स दर्पहा ॥ (718) दर्पदः—मधुरायां यादवेभ्यो मधुपानादिना ततः । दर्प च दत्तवान् योऽसौ दर्पदः परिकीर्तितः ॥ (719) अदृप्तः—अथाप्यगर्वितो योऽसौ अदृप्तः स उदाहृतः । दृप्तः—बाललीलाप्रसङ्गेषु यशोदानन्दलालनात् । दृप्तो मत्त-

भवत् (720) दुर्धरः—ताभ्यां दुर्ग्रहो दुर्धरो मतः ॥ (721) अपराजितः—दुर्योधनादिभिर्नित्यं रूढमूलैः पराजयः। न यस्य कुत्रचिद्वापि सोऽपराजित ईरितः ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७ ॥

(722) विश्वमूर्तिः—विश्वं मूर्तिस्तनुर्यस्य विश्वमूर्तिस्तु स स्मृतः । (723) महामूर्तिः—विश्वैकाश्रयमूर्तित्वात् महामूर्तिरिति स्मृतः ॥ (724) दीप्तमूर्तिः—यत्किञ्चित् केनचिद्दीप्रं गुणेनात्र विशेषतः। तत् सर्वं मूर्तिरस्येति दीप्तमूर्तिरसौ स्मृतः॥ (725) अमूर्तिमान्—अमूर्तिशब्देनोच्यन्ते ह्यव्यक्तपुरुषादयः। त एव यस्य स्वामिति स स्मृतः स्यादमूर्तिमान् ॥ (726) अनेकमूर्तिः—षोडश स्त्रीसहस्राणि शतमेकं ततोऽधिकम्। अनेकमूर्तिरित्युक्तः तत्संख्याकस्वदेहतः ॥ (727) अव्यक्तः—मनुष्यत्वेन सर्वत्र परभावाप्रकाशनात्। बुधैरव्यक्त इति च कथितस्तत्त्वपारगैः ॥ (728) शतमूर्तिः—अर्जुनाय व्यक्ततया विश्वरूपप्रदर्शनात्। शतमूर्तिः
अनेकाननसंपत्त्या शतानन इतीरितः ॥

एको नैकः स वः कः किं यत् तत् पदनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥

(730) एकः—द्वितीयस्वसजातीयराहित्यादेक उच्यते ॥ (731) नैकः—नैकः स्वविसजातीय विभूत्याख्यद्वितीयवान् ॥ (732) सः—सर्वेषु कृष्णरूपादिष्वाकुमारप्रसिद्धितः । अज्ञानं स्यन् स्वविज्ञानं निश्चयीकुरुते स सः। (733) वः—यथाप्रसिद्धिवासित्वात् स्वस्य भूतेष्वपि स्वयम्। भूतावासतया वः स्यात् (734) कः—सर्वेषु कनतीति कः ॥ (735) किम्—स ईप्सितार्थज्ञप्त्यर्थं प्रष्टव्यः किमिति स्मृतः ॥ (736) यत—रक्षायै पृच्छकान
भक्तिं भक्तानां तनोतीति तत् उच्यते ॥ (738) पदमनुत्तमम्—परमं च प्रपन्नानां प्राप्यं पदमनुत्तमम् ॥ (739) लोकबन्धुः—लोकानां स्वजनत्वाद्धि लोकबन्धुरिति स्मृतः ॥ (740) लोकनाथः—लोकबन्धत्व-

मूलं हि लोकस्वामित्वमित्यतः । स्वाभाविकाच्च संबन्धात् लोकनाथ इतीरितः ॥ (741) माधवः—लोकनाथत्वसंबन्धः श्रीमतश्चेति माधवः। मधोर्वंशोद्भवत्वाच्च माधवः परिकीर्तितः ॥ (742) भक्तवत्सलः—विशेषं वक्ति भक्तेषु योऽसौ स्यात् भक्तवत्सलः ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ७९ ॥

(743) सुवर्णवर्णः—गुणवत्स्वर्णनिकषनिर्दोषोज्ज्वलवर्णतः । सुवर्णवर्ण इत्युक्तः नवार्णो भक्तिकामदः ॥ (744) हेमाङ्गः—वर्णाधिष्ठान मङ्गश्च दिव्यसत्त्वमयं यतः । अतो हेमाङ्ग इत्युक्तः सप्तार्णो हेमवर्णदः ॥ (745) वराङ्गः—देवकीप्रीतये दिव्यं मङ्गलं दिव्यलाञ्छनम् । आविष्कृतं येन रूपं वराङ्गस्स तु कथ्यते ॥ (746) चन्दनाङ्गदी—भूषणान्यङ्गदादीनि सदाह्लादकराणि च । सन्ति यस्य हि नित्यं तु स स्मृतः चन्दनाङ्गदी ॥ (747) वीरहा—समूलं पूतनादीन् वै यो जघान स वीरहा ॥ (748) विषमः—भीतिक्षेमकरत्वाद्धि कुटिलाकुटिलात्मसु । विषमः स तु विख्यातः (749) शून्यः—शून्यः स्यात् दोषवर्जितः । (750) घृताशीः—गोपानां सद्मगव्ये वा जगदाप्यायनेऽथ वा । घृते त्वाशास्तिरस्येति घृताशीः परिकीर्तितः ॥ (751) अचलः—दुर्योधनाद्यभेद्यत्वात् अचलः परिकीर्तितः ॥ (752) चलः—सत्यादेः पाण्डवार्थे स चलतीति चलः स्मृतः ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत् ।
सुमेधा मेधजो धन्यस्सत्यमेधा धराधरः ॥ ८० ॥

(753) अमानी—अमानी योऽनहंकारी भक्तेष्वेव स ईरितः ॥ (754) मानदः—स मानदोऽर्जुनादिभ्यो मानं राज्यं च दत्तवान् ॥ (755) मान्यः—मान्यस्तदीयत्वेन स्यात् संमन्तव्यस्सदेति सः ॥ (756) लोकस्वामी—लोकः सर्वः स्वमस्येति लोकस्वामीति कथ्यते । (757) त्रिलोकधृत्—लोकत्रयस्य धरणात् स त्रिलोकधृदीरितः । (758) सुमेधाः—बुद्धिः सु शोभना यस्य सुमेधाः परिकीर्तितः ॥ (759) मेधजः—देवकीकृतपुत्रीयव्रतयज्ञे च यस्य वै । जनिस्तु मेधजः स स्यात् सप्तार्णः पुत्रदायकः ॥ (760) धन्यः—धन्यस्तु देवकीजन्मधनलाभादयं

स्मृत ॥ (761) सत्यमेधाः—वल्लवीवसुदेवादिसाजात्यस्याभिमानिनी। मेधा यस्यास्ति सत्या स सत्यमेधाः प्रकीर्तितः ॥ (762) धराधरः—गोवर्धनं शीघ्रं धृतवान् स धाराधरः ॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१ ॥

(763) तेजोवृषः—तेजोऽभिवर्षति यतः सुहृत्पालनलक्षणम् । तेजोवृष समाख्यातो वस्वर्णो मित्रवृद्धिदः ॥ (764) द्युतिधरः—अमानुषीं यो धृतवान् द्युतिमैन्द्राभिभावुकाम् । ख्यातः स हि द्युतिधरः वस्वर्णः कान्तिदो मनुः ॥ (765) सर्वशस्त्रभृतां वरः—जरासन्धादिसमरे श्रेष्ठः शस्त्रभृतां च यः । स ख्यातः सर्वलोकेषु सर्वशस्त्रभृतां वरः ॥ (766) प्रग्रहः—पार्थः सारथिनानेन सदश्व इव रश्मिभिः । प्रगृह्यते यतस्तत् स्यात् प्रग्रहः समुदाहृतः ॥ (767) निग्रहः—येन सारथ्यवैचित्र्यात् निगृह्यन्ते स्म शत्रवः । स निग्रहः समाख्यातः सप्तार्णः शत्रुनाशकः ॥ (768) व्यग्रः—युद्धक्रमासहिष्णुत्वात् पार्थविद्विड्विनिग्रहे । असौ व्यग्रः समाख्यातः षडर्णो वैरिनाशकः ॥ (769) नैकशृङ्गः—नैकशृङ्गो यस्य नैकं स्यात् शृङ्गं=वैरिबाधकम् । (770) गदाग्रजः—गदनाम्नश्चाग्रजत्वात् गदाग्रज इतीरितः ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥

(771) चतुर्मूर्तिः—बलभद्रो वासुदेवः प्रद्युम्नश्चानिरुद्धकः । ...ो मूर्तयो यस्य स चतुर्मूर्तिरुच्यते ॥ (772) चतुर्बाहुः—व्यूहमूलपरावस्थनिरुपाधिकरूपतः । चत्वारो बाहवो यस्य स चतुर्बाहुरुच्यते ॥ (773) चतुर्व्यूहः—समस्तव्यस्तषाड्गुण्यव्यूहावस... चतुर्व्यूह इति ख्यातः चतुर्वर्गप्रदो मनुः ॥ (774) चतुर्गतिः—चतस्रः प्राप्तयो यस्मिन् भक्तानां स चतुर्गतिः ॥ (775) चतुरात्मा—जाग्रदादिस्थूलसूक्ष्म चातुरात्म्यप्रकाशनात् । चतुरात्मा स विज्ञेयः वस्वर्णो मनुरुत्तमः ॥ (776) चतुर्भावः—शास्त्रदानादिकृत्याभिव्यञ्जनात् स्थूलसूक्ष्मतः । चतुर्भावः समाख्यातः मुन्यर्णश्च गतिप्रदः ॥ (777)

चतुर्वेदवित्—चतुर्वेदप्राज्ञनिष्ठा वित्तिर्यद्विषये स तु। चतुर्वेदविदित्युक्तः नवार्णो निगमप्रदः ॥ (778) एकपात्—एकांशेनावतीर्णत्वात् एकपादिति कथ्यते ॥

समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३ ॥

(779) समावर्तः—एतादृशं हि सर्वत्र सर्वदा सर्वथापि च। व्यूहस्य विभवस्यापि यस्यास्त्यावर्तनं स तु। समावर्तः समाख्यातः वस्वर्णो जन्मनाशकः ॥ (780) निवृत्तात्मा—निवृत्तात्मा मनो यस्य सदा जगदमिश्रितम् ॥ (781) दुर्जयः—शक्त्या देवमनुष्याद्यैर्वशीकर्तुं न शक्यते। अन्वेष्टुं वापि यः स स्यात् दुर्जयः सप्तवर्णकः ॥ (782) दुरतिक्रमः—अतिक्रम्य स्वपादाजं सर्वेषां प्रापकान्तरम्। नास्तीति सर्वपापघ्नः स स्मृतो दुरतिक्रमः ॥ (783) दुर्लभः—अजितेन्द्रियदुष्प्रापो दुर्लभः स च कथ्यते ॥ (784) दुर्गमः—नेत्रदुर्बलवृत्तीनां मध्याह्नद्युमणेर्यथा। दुष्प्रापाधृष्यतेजस्त्वात् दुर्गमः परिकीर्तितः ॥ (785) दुर्गः—दुष्प्रवेशतया दुर्गः पापिभिः सर्वथैव सः। (786) दुरावासः—दुष्करावासभूमित्वात् दुरावास इतीरितः (787) दुरारिहा—दुरारिणस्तु दुर्मार्गगामिनस्तान् निहन्ति यः। त्रयीमार्गत्याजनाद्यैः स स्यान्नित्यं दुरारिहा ॥

शुभाङ्गो लोकसारङ्गस्सुतन्तुस्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥

(788) शुभाङ्गः—मायामोहनवेषेण विप्रलभ्यासुरानपि। स्थितः प्रत्ययितस्तेषां शुभाङ्ग इति कथ्यते ॥ (789) लोकसारङ्गः—न्यायापेतं यत् सारं भोगनिर्वाणवर्त्म सः। तद्गच्छति सदा लोके लोकसारङ्ग रितः (790) सुतन्तुः—तन्तुः कृत्रिमशान्त्यादिरूपः तद्ग्रहणाय वै। शोभनोऽस्य सुतन्तुः स सप्तार्णो दोषनाशकः ॥ (791) तन्तुवर्धनः—अंशुभिः पापरुचिभिः तन्तुं संसारनामकम्। सन्तनोति सदा यः तन्तुवर्धन ईरितः ॥ (792) इन्द्रकर्मा—प्रपन्नेन्द्राद्यर्थतयां दैत्यसंहार। कर्म यस्यास्तीन्द्रकर्मा सोऽष्टार्णो मनुरुत्तमः ॥ (793)

महाकर्मा—एवं न्यायप्रवृत्तत्वात् महाकर्मेति कथ्यते ॥ (794) कृतकर्मा—स्वानुष्ठिततदाचारः कृतकर्मेति कथ्यते ॥ (795) कृतागमः—कृतवुद्धाद्यागमत्वात् कृतागम उदाहृतः ॥

उद्भवः सुन्दरः सुन्दो रत्ननाभस्सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥ ८५ ॥

(796) उद्भवः—मोक्षोपदेशनटनात् भवादुद्गतवत् स्थितः । उद्भवः स तु वज्ञेयः सप्तार्णः पापनाशकः । (797) सुन्दरः—स स्यात् सुन्दर उद्दिष्टः तेषां दृष्टिमनोहरः (798) सुन्दः—विश्वातिशायिसौभाग्यशालित्वात् स उनत्ति यत् । सुष्ठु चेतः क्लेदयति रक्षसां सुन्द ईरितः ॥ (799) रत्ननाभः—स रत्ननाभ इत्युक्तः यः पाण्डित्यविडम्बनात् । मृष्टोदरव्यक्तरम्यनाभिः सत्फलदो मनुः ॥ (800) सुलोचनः—सुलोचन इति प्रोक्तो मायामोहोर्जितेक्षणः ॥ (801) अर्कः—अत्यन्तधार्मिक इति स्तुतस्तैरर्क ईरितः ॥ (802) वाजसनिः—अन्नादीनैहिकानेव यस्मान्मह्यां भजन्तिते । स वाजसनिरित्युक्तः वस्वर्णोऽन्नप्रदो मनुः ॥ (803) शृङ्गी—करेऽस्ति पिञ्छिका यस्य शृङ्ग्यहिंसाविडम्बनात् ॥ (804) जयन्तः—सर्वप्रपञ्चमिथ्यात्वसंविदात्मत्ववादतः । आस्तिक्यवादिनां जेता जयन्त इति कथ्यते ॥ (805) सर्वविज्जयी—यस्य जय्याश्च सर्वज्ञाः सः उक्तः सर्वविज्जयी ॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥

(806) सुवर्णबिन्दुः—बिन्दत्यपलपत्यास्तिकत्वं षड्भिरक्षरैः सुवर्णबिन्दुर्गदितः नवार्णः पापनाशनः ॥ (807) अक्षोभ्यः—गभीराशयवत्त्वेन ह्यविकार्यतया परैः । अक्षोभ्यः सप्तवर्णः स्यादक्षोभ्यत्वप्रदायकः ॥ (808) सर्ववागीश्वरेश्वरः—वादितायाः गतः पारं सर्ववागीश्वरेश्वरः ॥ वाग्मितायाश्च सर्वेशः रव्यर्णो वाक्प्रदो मनुः (809) महाह्रदः—मज्जन्ति पापास्तृप्यन्ति पुण्या इति महाह्रदः ॥ (810) महागर्तः—पापाक्रान्ततया नष्टप्रज्ञानां रौरवादयः । गर्ता यस्मान्महागर्तः स स्मृतो वसुवर्णगः ॥ (811) महाभूतः—निग्राहकत्वं कथितं स्वस्यैवा-

ज्ञातिलंघनात्। स्वाज्ञानुवर्तिनां पुंसां अनुग्राहकतोच्यते। महाभूतो महात्मानः स्वभूता यस्य स श्रुतः (812) महानिधिः—महात्मानो निधिरिव प्रिया यस्य महानिधिः॥

कुमुदः कुन्दरः कुन्दः पर्जन्यःपावनोऽनिलः।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥ ८७॥

(813) कुमुदः—प्राकृते मण्डले भूमौ कुमुदः स्यात् सः मोदनात्। 814) कुन्दरः—मुक्तिभूमिप्रदा कुन्दसुमवद्विमला मतिः कुन्दम्, तत् दत्तेसौ कुन्दरः कीर्ति तोऽथवा। कुमव्ययं पापवाचि कुन्दरस्तस्य ारणात्॥ (815) कुन्दः—भक्तेभ्यः परभक्त्यादिप्रदानात् कुन्द उच्यते विदारितं पापजातं कुन्दः शोधयतीति वा॥ (816) पर्जन्यः—स्वतत्त्व- ।नेन नित्यं तापत्रयापहा। पर्जन्यः स (817) पवनः—तदर्थश्च ।वते पवनश्च सः॥ (818) अनिलः—स्वस्य यस्मात् प्रेरकोऽन्यः प्रपन्नानु- ’हे सदा। नापेक्ष्यः सोऽनिलः प्रोक्तो मुन्यर्णो मनुरुत्तमः॥ (819) ।।शः—यश्चाशयति भक्तान् वै स्वगुणामृतमादरात्। अमृताशः इत्युक्तः श्रुतपीयूषदो मनुः॥ (820) अमृतवपुः—वपुर्यस्यामृतसमं चामृतवपुः स्मृतः॥ (821) सर्वज्ञः—शक्याशक्यादिकं सर्वं साध्या- ध्यादिकं च यः। भक्तानामनुसन्धत्ते स सर्वज्ञ इतीरितः॥ (822) ’तोमुखः—तत्तन्नियममुत्सृज्य यो ज्ञातुं शक्यते बुधैः। व्याजेन येन स स्मृतः सर्वतोमुखः॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः॥ ८८॥

323) सुलभः—सर्वेषां सुखलभ्यत्वात् सुलभः परिकीर्तितः॥ (824) ुव्रतः—येन केनापि विघ्नानां सर्वथा परिपालनम्। दृढं सुष्ठु व्रतं यस्य । सुव्रत उदाहृतः (825) सिद्धः—अयत्नसाध्यः सिद्धः स्यात् स्वतत्त्व- श्रुतिवेदिनाम्॥ (826) शत्रुजिच्छत्रुतापनः—पुरुकुत्सककुत्स्थाद्यैश्शत्रु- ाद्भिस्स्वतेजसा। आप्यायितैरपि परान् यस्तापयति नित्यशः। अयमे पदेनोक्तः शत्रुजिच्छत्रुतापनः॥ (827) न्यग्रोधोदुम्बरः—न्यग्भूतैः गतैः स्वानुग्रहौन्मुख्येन रुद्ध्यते। यो व्यवस्थाप्यते नित्यं न्यग्रोधस्स ाहृतः॥ गुणत्रयादुद्गतं यत् परमं धाम चाम्बरम्। यस्योदुम्बर

एष स्यात् उः पृषोदरनीतितः। न्यग्रोधोदुम्बर इति ह्येकं नाम प्रकीर्तितम्। अत्युच्छ्रितानां सेव्यो योऽप्यतिनीचानुवर्तनः। न्यग्रोधोदुम्बरः स स्यात् दशार्णः सर्वसिद्धिदः। (828) अश्वत्थः—अनित्यमिन्द्रादिपदं येषां तेष्वपि तिष्ठति। नियामकत्वेनेत्येवमश्वत्थ इति कीर्तितः। (829) चाणूरान्ध्रनिषूदनः—चाणूराख्यासुरं योऽरिं मल्लं सूदितवानसौ। प्रोच्यते मुनिभिर्नित्यं चाणूरान्ध्रनिषूदनः॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः॥ ८९॥

(830) सहस्रार्चिः—सूर्ये सहस्रमर्चींषि शोषणादिषु हेतवः। अभिविष्टानि येनासौ सहस्रार्चिरिति स्मृतः॥ (831) सप्तजिह्वः—यस्मात् काल्यादयो जिह्वा अग्नेः सप्त भवन्ति च। स सप्तजिह्व आख्यातो लोकसन्तर्पणे रतः॥ (832) सप्तैधाः—वानस्पत्याश्च समिधः सप्तसंस्थास्तथाऽथवा। इष्टापूर्तादिकर्माणि सप्तैधाः सन्ति यस्य सः॥ (833) सप्तवाहनः—यो वहत्यनिलस्कन्धान् सप्तासौ सप्तवाहनः। वाहनानि रवेरस्य सप्त वा सप्तवाहनः। (834) अमूर्तिः—स्थूलभौतिकमूर्तिभ्यो व्यावृत्तोऽमूर्तिरुच्यते॥ (835) अनघः—जीवेभ्यः कर्मवश्येभ्यो व्यावृत्तश्चानघः स्मृतः॥ (836) अचिन्त्यः—अचिन्त्यो दुर्निरूपः स्यात् मुक्ताद्युपमयापि सः॥ (837) भयकृत्—आज्ञातिलंघिनां पुंसां नरकादिभयङ्करः। भयकृत् स समाख्यातः सप्तार्णो भववर्धनः॥ (838) भयनाशनः—अज्ञानुवर्तिनां स्वस्य भयं नाशयतीति सः। भयनाशन इत्युक्तो नवार्णः कर्मकारकः॥

अणुर्बृहत् कृशस्स्थूलो गुणभृन्निर्गुणो महान्।
अधृतस्स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः॥ ९०॥

(839) अणुः—अतिसूक्ष्महृदाकाशाव्यक्तजीवप्रवेशने। शक्तिमानणुरित्युक्तः षडर्णः सर्वशक्तिदः॥ (840) बृहत्—विपुलं परमव्योम महिम्ना चुलकीकृतम्। येन नाम्ना बृहत् स स्यात् षडर्णश्च बृहत्वदः॥ (841) कृशः—सर्वत्राव्याहतगतिः लघिम्ना कृश ईरितः॥ (842) स्थूलः—स्थित्वैकत्राखिलं स्प्रष्टुं शक्तिर्या महती सया। तया प्रकृष्टया शक्त्या विशिष्टः स्थूल उच्यते॥ (843) गुणभृत्—संकल्पात् स्वगुणी-

भूतसर्वावस्थमिदं जगत्। कुर्वन् बिभर्ति नित्यं यो गुणभृत् स स्मृतो बुधैः ॥ (844) निर्गुणः—स्थितोऽप्यतद्वश्यतया जगत्यस्पर्शनात् गुणैः। उक्तः स निर्गुण इति सप्तार्णः पावनत्वदः ॥ (845) महान्—भूम्यां महानीर इव ह्युन्मज्जननिमज्जनात्। महान् प्राकाम्यसंपूर्त्या षड्गस्तु महत्त्वदः ॥ (846) अधृतः—यश्चानियाम्यः केनापि ह्यधृतः स तु कीर्तितः ॥ (847) स्वधृतः—स्वभावतो धृतैश्वर्यः स्वधृतः परिकीर्तितः ॥ (848) स्वास्यः—आसनं शोभनं यस्य स स्वास्य इति कथ्यते ॥ (849) प्राग्वंशः—अनादिमुक्ताः प्राञ्चो ये तेषामुद्भवभूमिदः। प्राग्वंश इति विख्यातः सप्तार्णो मनुरुत्तमः ॥ (850) वंशवर्धनः—नित्यसिद्धस्य वर्गो यो वंशं सन्तानलक्षणम्। तं वर्धयति यश्चासौ वंशवर्धन उच्यते ॥

भारभृत् कथितो योगी योगीशः सर्वकामदः।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥

(851) भारभृत्—मुक्तानां बन्धमोक्षादिभारस्य भरणाद्धि सः। भारभृन् सप्तवर्णः स्यात् कार्यनिर्वाहशक्तिदः ॥ (852) कथितः—उक्तः शास्त्रेषु कथितो यस्सर्वैगुणवत्तया ॥ (853) योगी—योगो ह्यघटितार्थस्य घटनं तेन सर्वथा। यस्यास्ति नित्यसंबन्धः स योगी परिकीर्तितः ॥ (854) योगीशः—योगीशः सनकादीनां योगिनां धुर्य उच्यते ॥ (855) सर्वकामदः—अणिमादीन् सर्वकामान् योगस्खलितयोगिनाम्। अन्तरायतया मुक्तेर्ददत् स्यात् सर्वकामदः ॥ (856) आश्रमः—तेषां योगभ्रष्टानां हेतुर्वैराग्यसम्भ्रमु। सुभिक्षादिविधेषु विश्रान्तेराश्रमः स्मृतः ॥ (857) श्रमणः—अक्षीणपूर्वसंस्कारैर्जन्मनाऽनुभवेन सः। तेऽभ्यस्यन्तेऽनेन श्रमणः परिकीर्तितः ॥ (853) क्षामः—योगाभिमुख्यमात्रेण योगभ्रष्टा अपि स्वयम्। यस्मात् क्षमन्ते स क्षामो भवाब्धितरणाय वै ॥ (859) सुपर्णः—प्रत्यापन्नसमाधीन् यः समाधेः परिपाकतः। नयते तमसः पारं सुपर्णः स च कीर्तितः ॥ (860) वायुवाहनः—वायुना गत्वरेणेव कर्मतः पतितान् सतः। गहनतो वाहयति यः स वायुवाहनः ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिताऽदमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ॥ ९२ ॥

(861) धनुर्धरः—उपासकानां भक्तेर्यः प्रत्यूहविनिवृत्तये । धनुषो धारको नित्यं स्वयं स स्याद्धनुर्धरः ॥ (862) धनुर्वेदः—सुरेन्द्राद्या धनुश्शास्त्रं यस्मात् विन्दन्ति स श्रुतः । धनुर्वेदो ह्यष्टवर्णो धनुर्वेद-प्रदायकः ॥ (863) दण्डः—वेदधर्मातिरिष्टतातिनृपादिमुखतः खलान् । दण्डनीत्या दण्डयतीत्यसौ दण्डः प्रकीर्तितः ॥ (864) दमयिता—ताच्छील्याद्रावणादीनां हर्ता दमयिता स्वयम् । (865) अदमः—कश्चिद्दमयिता नास्ति यस्यासावदमः स्मृतः ॥ (866) अपराजितः—क्वचित् कदाचित् कस्माच्चित् सर्वतोमुखशासने । यस्य प्रतिहतिर्नास्ति स वै स्यादपराजितः ॥ (867) सर्वसहः—मन्दाधिकारिणां सर्वमारा-ध्यत्वेन दैवतम् । बिभर्ति सहते यस्तु स सर्वसह ईरितः ॥ (868) नियन्ता—दैवतेषु च सर्वेषु तत्तदिच्छान् प्ररोचयन् । मन्दाधिकारिणो योऽसौ नियन्ता स्यान्नियच्छति ॥ (869) नियमः—भोगादिकं नियम्या-स्मिन् लम्भयन् नियमः स्मृतः ॥ (870) यमः—यमादीन् यच्छति यमः तत्तत्फलनियामकान् ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥ ९३ ॥

(871) सत्त्ववान्—प्रकाशलाघवसुखसंपदा मोक्षसाधनम् । सत्त्वं साक्षादधिष्ठेयं यस्यासौ सत्त्ववान् श्रुतः ॥ (872) सात्त्विकः—विज्ञानैश्वर्यवैराग्यधर्मरूपफलं स्वयम् । नियम्याहेति सत्त्वं यः सात्त्विकः परिकीर्तितः ॥ (873) सत्यः—यथार्थवैभवः सत्यः श्रुतः सात्त्विक-शास्त्रतः ॥ (874) सत्यधर्मपरायणः—उपाधिरहितस्सर्वमुख्यो धर्मः परा-यणम् । परमप्रीणनो यस्य सत्यधर्मपरायणः ॥ (875) अभिप्रायः—स्वच्छेन धर्मनिष्ठेन योऽभितः प्रेयते पुनः । निरुपाधिकमुद्देश्यतयाऽसावभि-संहितः । अभिप्रायः इति ज्ञेयो चस्वर्णो मनुरुत्तमः ॥ (876) प्रियार्हः—ऐदमर्थ्यज्ञानिनं यः प्रियार्हः प्रियमर्हति ॥ (877) अर्हः—अनन्येच्छावतां पुंसां योग्यः सोऽर्ह इति स्मृतः ॥ (878) प्रियकृत्—भक्तान् अन्यपरानेवं स्वप्रियान् कुरुते सदा । छन्दानुवर्तनेनेति प्रियकृत् स निगद्यते ॥

(879) प्रीतिवर्धनः—गुणाविष्करणान्नित्यमुत्तरोत्तरतोऽधिकम् । यस्तु प्रीतिं वर्धयति प्रीतिवर्धन ईरितः ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनस्सूर्यः सविता रविलोचनः ॥ ९४ ॥

(880) विहायसगतिः—निरूढभक्तियुक्तैर्हि नित्यं यस्मात्तु गम्यते । विहायसः परं व्योम विहायसगतिस्तु सः ॥ (881) ज्योतिः—स्वप्राप्तेः साधनत्वात् यः स्वयं नित्यं विशेषतः । अर्चिरादिगतेर्ज्योतिः प्रथमं पर्व कथ्यते ॥ (882) सुरुचिः—अहः शुभं यस्य स वै सुरुचिः परिकीर्तितः ॥ (883) हुतभुग्विभुः—हुतं सुधापरिणतं भुञ्जानश्चन्द्रमास्तथा । विभुः पूर्णो भवेद्यस्मिन् स वै स्याद्धुतभुग्विभुः ॥ (884) रविः—यश्चोत्तरायणद्वारा रूयतेऽत्र प्रशस्यते । स वै रविः समाख्यातः प्राशस्त्यफलदो मनुः ॥ (885) विरोचनः—अयनद्वयगत्याऽर्कं यो विरोचयति स्वयम् । विरोचन इति ख्यातः प्रकाशफलदो मनुः ॥ (886) सूर्यः—वायुस्सरति यस्माद्धि तस्मात् सूर्यः षडक्षरः ॥ (887) सविता—वृष्टिसस्यादिकं सूते सवितेति रवेर्मुखात् । (888) रविलोचनः—सूर्यस्य रश्मिसंबन्धात् विद्युद्वरुणचन्द्रकान् । निरन्तरं लोचयति रविलोचन ईरितः ॥

अनन्तहुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५॥

(889) अनन्तहुतभुग्भोक्ता—मरुत्वान् हुतभुक् भोक्ता यो भुनक्ति प्रजा विधिः । सोऽनन्तहुतभुग्भोक्ता महान्तौ यस्य तौ सदा ॥ (890) सुखदः—अमानवकरस्पर्शाद्भवमुत्सार्य सत्वरम् । स्वप्राप्तिलक्षणसुखं ददाति सुखदश्च सः ॥ (891) नैकदः—ब्रह्मालङ्कारदायिन्यो मुक्तेभ्यश्च परे पदे । दिव्यास्त्वप्सरसो यस्य नैकदस्स च कथ्यते । (892) अग्रजः—स्वस्याग्रे प्राप्तमुक्तानां सर्वैश्वर्यश्रिया सह । यथापर्यङ्कविद्यं च करुणाविष्टचेतसा । तद्भोग्यो जायते यश्च सोऽग्रजः परिकीर्तितः ॥ (893) अनिर्विण्णः—महता प्रणिधानेन ह्युत्तार्य भवगर्ततः । प्राप्य च तमात्मानं कृतकृत्यश्च विज्वरः । पश्यन्नशोच्यमेनं यो ह्यनिर्विण्णः स ईरितः ॥ (894) सदामर्षी—कृतप्रतिकृतं त्वस्य निर्वोढुं मर्षितुं भवेत्

सर्वदा शीलमस्येति सदामर्षीति कीर्तितः ॥ (895) लोकाधिष्ठानम्—लोकानां मुक्तभाग्यानां लोकाधिष्ठानमाश्रयः ॥ (896) अद्भुतः—सर्वदा सर्वथा सर्वैर्भुज्यमानोऽप्यपूर्ववत् । स्मयनीयोऽद्भुतः प्रोक्तः ।

सनात् सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥

(897) सनात्—तेषां संभजनात् सनात् ॥ (898) सनातनतमः—नित्यनूतनभोग्यत्वात् सनातनतमः स्मृतः ॥ (899) कपिलः—विद्युन्मण्डलमध्यस्थनीलमेघवदुज्ज्वलः । कपिलः स समाख्यातः सप्तवर्णो महामनुः ॥ (900) कपिरव्ययः—निंय सुखं स्वानुभवं पात्ययं कपिरव्ययः ॥ (901) स्वस्तिदः—भक्तेभ्यो मङ्गलं स्वस्ति ददानः स्वस्तिदः स्मृतः ॥ (902) स्वस्तिकृत्—स्वस्ति भोगाशिषं यस्तु करोति स्वस्तिकृच्च सः ॥ (903) स्वस्ति—महामङ्गलरूपत्वात् स्वयं स्वस्तीति कथ्यते ॥ (904) स्वस्तिभुक्—पालनान्मङ्गलस्यैवं स्वस्तिभुक् चेति गम्यते ॥ (905) स्वस्तिदक्षिणः—शक्त्याद्या प्रकृतिः स्वस्ति स्वात्मदानं च दक्षिणा । आत्मार्पणाख्ययागे तु यस्यासौ स्वस्तिदक्षिणः ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७ ॥

(906) अरौद्रः—स्वैश्वर्येऽपि सुगुणः शीतलोऽरौद्र उच्यते ॥ (907) कुण्डली—दिव्यभूषणवान् योऽसौ कुण्डलीति प्रकथ्यते ॥ (908) चक्री—नित्यदिव्यायुधः चक्री (909) विक्रमी—स्याद्विलासी तु विक्रमी ॥ (910) ऊर्जितशासनः—ब्रह्माद्यलंघ्यस्वाज्ञो यः स स्यादूर्जितशासनः ॥ (911) शब्दातिगः—अनन्तशाखैराम्नायैः वाग्देव्याऽनन्तभोगिना । वक्तुं ह्यशक्यो महिमा यस्य शब्दातिगोऽस्ति सः ॥ (912) शब्दसहः—अतिभारमिवासह्यं तिरश्चां शब्दमार्तिजम् । सहते यः शब्दसहो, वस्वर्णो मनुरुत्तमः ॥ (913) शिशिरः—गजेन्द्रपालनार्थं यः शिशिरस्तरसा गतः ॥ (914) शर्वरीकरः—उच्यते शर्वरीशब्दात् हिंसापरविदारिणी । पञ्चायुधी करे साऽस्येत्युदितः शर्वरीकरः ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥

(915) अक्रूरः—योऽसौ धृतायुधैर्ग्राहमक्रूरो मङ्क्षवकृत्तवान् ॥ (916) पेशलः—त्वरातिशयतः स्रस्तस्रग्भूषाम्बरसुन्दरः । गजेन्द्ररक्षासमये योऽसौ स्यात् पेशलः स्मृतः ॥ (917) दक्षः—दक्षो यो द्रुतमागन्ता रक्षणाय स उच्यते । (918) दक्षिणः—गजेन्द्रस्य प्रपन्नस्य यः प्रीतो दक्षिणस्तु सः ॥ (919) क्षमिणांवरः—गजेन्द्रदर्शनेनासौ धृतात्मा क्षमिणां वरः । (920) विद्वत्तमः—गजेन्द्रार्तिचिकित्सायां विद्वान् विद्वत्तमस्तु सः ॥ (921) वीतभयः—वीतं भयं गजेन्द्रस्य यस्मात् वीतभयश्च सः ॥ (922) पुण्यश्रवणकीर्तनः—गजेन्द्रमोक्षणं श्रुत्वा सद्यः पापात् प्रमुच्यते । यस्मात् तत्कीर्तनं पुण्यं श्रवणं चेति स स्मृतः । द्वादशार्णो मनुश्रेष्ठः पुण्यश्रवणकीर्तनः ॥

उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९ ॥

